

# नन्दनवनकल्पतरुः ४३

शासनसम्राजामिह समुदाये मेरुपर्वतौपम्ये ।
कल्पतरुर्नन्दनवन-सत्कोऽयं नन्दतात् सुचिरम् ।।

वि. सं. २०७६
दक्षिणायनम्

सङ्कलनम्
पन्यासकल्याणकीर्तिविजयः गणी

## आर्थिकसौजन्यम्

नन्दनवनकल्पतरोस्त्रयश्चत्वारिंश्याः शाखायाः
प्रकाशनार्थं भावनगरसत्केन श्रीभावनगर-
जैन-श्वेताम्बर-मूर्तिपूजक-तपागच्छीयसङ्घेन
पूर्ण आर्थिकः सहयोगः
कृतोऽस्तीति तदर्थं बहुशो धन्यवादाः ॥

# मर्म गभीरम्

- कल्याणकीर्तिविजयः

यहूदीय एको धर्मगुरुः **बालशेमाभिधः** स्वीये रहस्यविद्यालये वसति स्म । स प्रत्यहं रात्रौ नद्यास्तटेऽटनं करोति स्म, कञ्चित् कालमुपविशति स्म, निशीथे च स्वनिवासं प्रत्यायाति स्म । एतेन तस्य मनःस्वास्थ्यं सदा समीचीनमवर्तत, ध्यानं च पुष्टं भवति स्म । एकतो रात्रेर्गहनोऽन्धकारो अन्यतश्च नदीतटीया परमा शान्तिः । ईदृशे वातावरणे सहजतयैव मनः स्थिरीभवेत्, समाधिश्च सिध्येत् । स तत्र किमप्यकृत्वा केवलं स्वं स्वीयवृत्तीश्च साक्षितया निभालयति स्म । अयं क्रमो वर्षाणि यावदखण्डतया वरीवर्ति स्म । तस्य साधनाऽपि सर्वथाऽक्षुण्णतया प्रवर्तते स्म ।

अथाऽन्यदा निशीथे स्वनिवासं प्रत्यागच्छन् बालशेमः केनचिद् धनिकगृहरक्षकेणाऽऽहूतः कथितश्च - "भो ! धर्मगुरो ! यदि भवतो बाधा न स्यात् तदा किञ्चित् प्रष्टुमिच्छामि । भवान् प्रत्यहं रात्रौ नदीतटं गत्वा मध्यरात्रे प्रतिनिवर्तते । बहुवारं मया भवाँस्तत्र गच्छन् प्रत्यागच्छंश्च विलोकितः । कदाचिच्च भवतः पृष्ठत आगत्य, तत्र स्थित्वा भवान् किं करोतीत्यप्यवेक्षणं कृतम् । परं भवाँस्तु केवलं निःशब्दतया नदीतटे उपविष्टो भवति । न किञ्चिदपि कुर्वन् दृश्यते । अतोऽहं ज्ञातुमिच्छामि यद् भवान् तत्र किं करोति ? भवतो निर्वाहः कथं भवति ? एवमुपवेशनेन भवता किं वा प्राप्यते ? तत्र किञ्चिद् रहस्यमिवास्ति वा ? कृपया मे जिज्ञासां शमयतु" ।

बालशमेनोक्तं - "भो! अहं जानामि यद् भवान् मां प्रत्यहमवलोकयति, तथा मे पृष्ठत आगत्य मां च पर्यवेक्ष्य निर्गत इत्यपि मम ज्ञातचरमेव । अतो ममाऽपि भवादृश्येवोत्सुकताऽस्ति यत् को भवान्, किं वा भवतः कार्यमिति" । दौवारिकेणोक्तं - "अहं त्वेकः सामान्यो गृहरक्षकोऽस्मि" । बालशेमेनोक्तं - "अहो प्रभो! कीदृशी भवतः करुणा ! अरे महानुभाव ! अहमपि भवादृशो रक्षक एवाऽस्मि" । रक्षक आह स्म - "भवत्कथनं नाऽवबुध्ये भोः! । यदि भवान् रक्षकोऽस्ति तर्हि रात्रौ नदीतटे उपविश्य किं वा रक्षणं कुर्वन्नस्ति !" ।

बालशेम उक्तवान् - "भोः सर्वोऽपि विशेषोऽत्रैवाऽस्ति । भवान् कस्यचिद् गृहे रक्षकत्वं समाचरति, तद्गृहे न केनचित् प्रवेष्टव्यमिति च सर्वकालं निभालयति । परमहं तु स्वस्यैव रक्षां कुर्वन् पर्यवेक्षे यत् कोस्त्ययं रक्षकः, किं करोति, कुत्र वा गच्छति, कथं वा जीवतीति, आजीवनं ममैतादृशमेव रक्षकत्वम् । स्वस्यैव रक्षकोऽहमस्मि" ।

"एतत् कार्यं तु सर्वथाऽद्भुतम् । किन्त्वेतदर्थं भवते वेतनं को वा दद्यात् ?"

"भोः! अस्य कार्यस्य करणे मयाऽसीम आनन्दः प्राप्यते, चित्तनैर्मल्यं च सदा वर्तते । एतदेव मत्कृते महद् वेतनम् । आर्थिकसाफल्यादप्येतस्मिन् कार्ये मे जीवनसार्थक्यं भवतीति नाऽन्यत् किञ्चिदिच्छामि" ।

"एवं वा ? तर्हि ममाऽपि तादृशं रक्षकत्वं शिक्षयतु येनाऽहमपि स्वरक्षकत्वं कुर्वे भवत्तुल्यतया च वेतनत्वेनाऽसीममानन्दं चित्तनैर्मल्यं च प्राप्नुयाम्" ।।

********

**नन्दनवनकल्पतरुः** ४३
(षाण्मासिकी अयनपत्रिका) (दक्षिणायनम्)

**सङ्कलनम्** पंन्यासः कल्याणकीर्तिविजयः

**प्रकाशनम्** श्रीजैनग्रन्थप्रकाशनसमितिः, खम्भातः

**वि. सं. २ ०७६, ऐ.सं. २०१९**

**मूल्यम्** ₹ 125 /-

**अस्मिन् जालपुटे उपलभ्यते** – www.jainelibrary.org
email : nandanavanakalpataru99@gmail.com

**प्राप्तिस्थानम्** विजयनेमिसूरि ज्ञानशाला
शासनसम्राट्भवनम्
शेठ हठीसिंह केसरीसिंह वाडी
शाहीबाग रोड, दिल्ली दरवाजा बहार
अमदावाद 380001
फोन – 079-22168554, 9726590949

**सम्पर्कसूत्रम्** **पं. कल्याणकीर्तिविजयः**
C/o Sandeep D Shah
Plot # 227, # 502 Balaji Sadan, Opp SIES School, KAS Road,
King's Circle, Matunga,Mumbai 400019.
Mo. 9820775295

**मुद्रकः** किरीट पटेलः
क्रिश्ना ग्राफिक्स, अमदावाद-13
Mo. 9898659902

# वाचकानां प्रतिभावः

नन्दनवनकल्पतरुं, नु द्वाचत्वारिंशच्छाखाभिः ।
विस्तृतवपुषं दृष्ट्वा, विद्वत्कल्याणकीर्तिमाशासे ।।

गौरितिशब्दस्साधुः, तस्याऽपभ्रंशसम्भवा नाना ।
गायी-गावीत्याद्या, एतत् पातञ्जलं महाभाष्यम् ।।

यस्संस्कृतज्ञः प्रकृतिस्वभावः, षट्प्राकृतं तेन विभावनीयम् ।
यत् प्राकृतं कल्पतरौ प्ररूढं, तस्याऽपि शिक्षाऽस्तु सुसंस्कृतेन ।।

प्राकृतशिक्षणकार्यं, त्वनुवादैस्संस्कृतेन शुद्धं स्यात् ।
भावानुवादमात्रं, भाषाशिक्षणसमीहितं न स्यात् ।।

प्राकृतनानारूपाण्यपि, वेद्यान्येव हि संस्कृतज्ञेन ।
अत एवं पदमैत्री, भाषाभ्यासाय भूयतां भूयः ।।

पद्यस्य तादृशं वृत्तं, माऽनुवादे नियम्यताम् ।
अपभ्रंशस्य मूलं तु, प्रायो योज्यं हि संस्कृते ।।

यथा – नेमिसूरिस्तवे –

वाणी जस्स मणप्पसायजणणी वक्खाणवेलुब्भवा
संदेहोम्महणी सुधम्मपरमत्थोब्भावणी पावणी ।
एवं धम्मकहीतिलद्धबिरुदो वक्खाणवायप्फई
वंदेमो जिणसासणुन्नइकरं तं नेमिसूरीसरम् ।।

वाणी यस्य मनःप्रसादजननी व्याख्यानवेलोद्भवा
सन्देहोन्मथनी सुधर्मपरमार्थोद्भावनी पावनी ।
एवं धर्मकथीति लब्धबिरुदो व्याख्यानवाचस्पतिः
वन्दामहे जिनशासनोन्नतिकरं तं नेमिसूरीश्वरम् ।।

एवं – सिरिचंदरायचरिए – असंतोसी दिओ णट्ठो, संतोसी अ महीवई ।
सलज्जा गणिगा नट्ठा, निल्लज्जा य कुलंगणा ।।

असन्तोषी द्विजो नष्टः, सन्तोषी च महीपतिः ।
सलज्जा गणिका नष्टा, निर्लज्जा च कुलाङ्गना ।।

इति प्राचीना संस्कृतसूक्तिरेव प्राकृतेऽवतारिता । इदमनलङ्कृतमिव पद्यम् । अलङ्कृतं चाऽस्मद्गुरुपरम्परायां च पद्यम् –

असन्तुष्टो द्विजो नष्टः सन्तुष्ट इव पार्थिवः ।
सलज्जा गणिका नष्टा, निर्लज्जेव कुलाङ्गना ।।

भावानुवादो रमणीय एव, भाषानुवादोऽपि सुशिक्षणाय ।
भाषान्तरं वेद्यमहो महार्थं, द्व्यर्थं कथं वा रइ-वत् सुवाच्यम् ।।
रविवद्-रतिमत् कमले कुसुमे रइ-इत्यतुलं पदमेकमहो ।
रयिमप्यथ संस्कृतसङ्गतिकं दिशतीति विशेष उदाहरणम् ।।

यथा च द्व्याश्रये हेमकाव्ये –

पहु सिरिनयरसिरीए जुज्जसि, जुप्पसि तिलङ्गलच्छीए ।
जुज्जसि कंचिसिरीए, भुंजंतो दाहिणिं इण्हिं ।।
प्रभो श्रीनगरश्रिया युज्यसे, युप्यसे त्रिलिङ्गलक्ष्म्या ।
युज्यसे काञ्चीश्रिया, भुञ्जानो दक्षिणामाभिः ।।
चड्डिअनक्का मड्डियमहातडा खड्डिआखिलारामा ।
पन्नाडिअह्लदपङ्का तुज्झ चमूए कया रेवा ।।
छर्दितनक्रा मर्दितमहातटा खण्डिताखिलारामा ।
प्रणाडितह्लदपङ्का तव चम्वा कृता रेवा ।। इति ।।
पण्डितनरेन्द्रचन्द्रात् भावो वृत्तानुवादतो जातः ।
भाषापदानुकूलं लिखितं रामेण किञ्चिदिव वेद्यम् ।।
नन्दनवनकल्पतरौ कवयित्र्यः संस्कृते बहुलाः ।
दृश्यन्ते सरला अपि, भाषाक्षीरस्य दोहिनीष्विति शम् ।।
पालक्काडु-रवीन्द्रस्य वचनं श्लाघने परम् ।
प्राकृतं संस्कृतेनैवं योज्यतामनुवादतः ।।
ग्रन्थत्रयसमीक्षासु मन्मित्राणि त्रयो बुधाः ।
श्लाघिता नन्दनवन-कल्पतरुणेति प्रियं मम ।।
अणहिल्लनगरपरिचयविस्मयसुप्रीतहृदयोऽहम् ।
प्राचीननगरदर्शनलाभायाऽस्ति च समुत्सुको रामः ।।
यशस्तिलकचम्पूस्तु बाल्येऽधीता समग्रतः ।
विश्वकोशसमा नागराजस्तस्याऽस्तु सारदा ।।
मर्मनर्मसु सन्तोषः श्लाघ्यो न खलु दण्डनम् ।
वाहनस्थापनस्थाने लिख्यतां वाक्यमुत्तमम् ।।
इति श्रीरामशर्माख्यो यदुशैलनिवास्यहम् ।
आदितो नन्दनवनकल्पतरुणाऽऽनन्दितोऽलिखत् ।।

इति राष्ट्रपतिप्रशस्तिभाजनं पञ्चभाषाकवितावल्लभः

**अरैयर् श्रीरामशर्मा**

नन्दनवनकल्पतरोर्द्वाचत्वारिंशी शाखा पठिता । अद्यत्वे प्रायशो जना दूरवाणीलग्ना दृश्यन्ते । ज्ञातव्यानि कार्याणि इ-मेल द्वारा ज्ञायन्ते । पत्रलेखनमपि नास्ति । सर्वं दूरवाणी-मुखेन क्रियन्ते । प्रास्ताविके पुस्तकवाचनस्य यन्महत्त्वमुक्तं तत्तु यथोपपन्नमेव । मोक्षयशा-श्रियः "क्षमा वीरस्य भूषणम्" इति लेखः सर्वेषु स्नेहिष्यामि इति मतिं दढीकरोति । येऽस्मासु स्निह्यन्ति तेऽप्यस्माभिः स्नेहनीयाः । नेदमेव, येऽस्मभ्यं द्रुह्यन्ति तेऽपि स्नेहितव्या अस्माभिः । एवंविधः स्नेहशीलो जन एव वीरः । श्रीकस्तूरसूरीश्वराणां जीवनवृत्तमिदम्प्रथमतया भवत्कीर्तितैस्तेषा-मवदानकैः परिचायितम् । यद्यपि तेषां प्राकृतभाषारचना नाऽवगताः, तथाऽपि तेषामेव संस्कृत-भाषानिबद्धं "चन्द्रचरित्रम्" तु कुसुममनोहरं द्राक्षामधुरं चाऽस्तीति पठनादनुभूतम् । तत्तु सम्य-गास्वादितम् । तत्र "बभूविवान्" इत्यादयोऽपरिचिताः प्रयोगा अपि दृष्टाः । अन्याः कथाः हृदय-ङ्गमाः । "शाखाच्छेदः" इति कथायां श्येनस्य निकषा इति प्रयोगः दृष्टः । निकषायोगे द्वितीया - इति श्रुतम् । (श्येनं निकषा?) । संस्कृतानुवादेन प्राकृतद्व्याश्रय-महाकाव्यभागश्च आस्वादितः ।

**रवीन्द्रः**

पालक्काडु

******

सादरं प्रणतयः ।

पुस्तकं सारस्वतम् । सरस्वत्याः प्रसादजम् । सुज्ञानां सारस्वतावतारः पुस्तके । प्रज्ञायाः परिपाकश्चाऽपि पुस्तके । निरन्तरपठनेन, सूक्ष्मावलोकनेन, नानाविधानुभवेन च समृद्धां स्वकीयां प्रज्ञां शब्दतोऽवतारयन्ति सुज्ञाः ।

यद्यपि, वक्तव्येऽपि शब्दाः प्रयुक्ताः स्युस्तथाऽपि तत्र शैथिल्यस्य सम्भावना ।

अन्यतः कस्मिन्नप्येकस्मिन् विषये, स्वस्थतयाकृते ध्याने, यः परिपाकः प्रस्फुरति, स एव पुस्तके प्रस्तूयते ।

Writing Makes a man perfect.

लेखनेन जनः परिपक्वो भवति, यद्यन्यथा वाच्यं तदा, परिपक्वो जन एव लेखको भवति । अतः शास्त्रज्ञानसम्पन्नानां स्वानुभवसमृद्धानां तर्कादिभिः परीक्षितविषयाणां देशिकचरणानां कृपया प्राप्तः पुस्तक-प्रसादः, प्रासादिकः प्रोन्नतिकरश्च भवति ।

सम्प्राप्य पुस्तकं प्रीत्या, स्वजिज्ञासानुरूपतः ।
पठंश्चाऽवगत्य प्रीतः, विशिष्टश्शोभते नरः ।।

पुस्तकस्था परा विद्या, प्राप्या किं पठनं विना ? ।
कृत्वैव भोजनं भ्रातः !, तृप्तिश्शक्तिश्च लभ्यते ।।
अस्तु पुस्तकप्रीतिरस्माकम् ।

डो.वासुदेव वि. पाठकः 'वागर्थः'

*****

यथायोग्ये यथायोग्यं, तथैव च यथापले ।
यद्याप्तं पुस्तकं योग्यं, तर्हि कल्पतरुप्रभा ।।

महाकविना कालिदासेन रघुवंशस्याऽऽरम्भे सम्यग्विचार्य कृता वन्दना पार्वती-परमेश्वरयोः । तत्र, वागर्थाविव सम्पृक्तौ तौ, इति निवेदितम् । अपेक्षाऽप्यस्ति 'वागर्थ-प्रतिपत्तये' । एवं जाते, जायते शब्दपाकस्य काव्यम् । तादृशान्येव काव्यानि जीवन्ति ।

सुदीर्घकालात् प्राप्तानि तादृशानि काव्यानि, अस्माकं ज्ञानवृद्ध्यर्थं, तदनु च सविशेषां साहित्यसमृद्धिमानेतुमपि कल्पवृक्षसदृशानि भवन्ति ।

नवं नवं ज्ञानं विज्ञानं च तत्र तत्र सन्दृश्यते पुस्तकेषु । सुचारुतया सङ्गृहीतं सम्यक्तया शनैः शनैः पठ्यमानं च तद् वैचारिकीं सम्पत्तिं जनयत्यभिव्यक्त्यर्थं च सामर्थ्यं प्रददाति । समग्रा चैषा चर्चा, निर्दिष्टे श्लोके निवेदिता सारतः । प्रवर्तिता एषा प्रथा समग्रस्य समाजस्य कृते, जनयति नन्दनवन-सौख्यं, परमानन्दं च जनयति । एतदर्थं वाचनप्रवृत्तिप्रोत्साहका गुरवः सबहुमानं प्रणम्यन्ते । फलतः

तपः सारस्वतं नः स्याद्, विवृद्धं संस्कृताश्रितम् ।
गुरूणामाशिषा चैव, प्रीतिरस्तु परात्परा ।।
गरिमा देशिकानां या, भवति प्रेरणात्मिका ।
लोपस्तस्याः कदाप्येव, न भवेदिति प्राप्यते ।।

इति शम् ।।

डो.वासुदेव वि. पाठकः 'वागर्थः'

******

भवद्भिः प्रेषितं नन्दनवनकल्पतरोः ४२तममङ्कं प्राप्तवानहम् । एतच्छ्लाघार्थं मम शब्दकोशे शब्द एव नास्ति । देवभाषोत्थाने भवतां योगदानमप्रतिममस्ति । मम पक्षतो नैकाः शुभाशयाः प्रेषयामि ।

**डॉ. राजेन्द्र जोशी**, लोहारदा (जि. देवास, म.प्र.)

# प्रास्ताविकम्

अद्यत्वे, अस्माकं देशे शिक्षणस्य स्तरः शनैः शनैस्तथा निम्नो जातोऽस्ति यथा शालेयाध्ययनानन्तरं पित्रादिभिरुत्तम-शिक्षणार्थं बहवो विद्यार्थिनो विदेशेषु प्रेष्यन्ते । शालेयाध्ययनस्याऽपीयमेव परिस्थितिः । एतत्त्वन्यद् यत् प्रायशो देशे सर्वत्र बहुधा विश्वविद्यालया महाविद्यालयाः शालाश्चाऽर्थार्जनायाऽनिवार्यां पदवीं दातुं तु समर्था एवेति कृत्वा विद्यार्थिभिः सङ्कीर्णा दरीदृश्यन्ते । परं ज्ञानार्जनं, विकासः सर्जनात्मकता, विचारशक्तिरित्यादिभिः परिपूर्णमेकं समुज्ज्वलं भावि निर्मातुं त्वेते महाविद्यालया विश्वविद्यालया वा सर्वथाऽसमर्था एव । यतो बहुशो सामान्या जनाः शिक्षणक्षेत्रीयाश्चाऽपि जनाः शिक्षणं नाम किमिति सर्वथा न जानन्ति, नाऽपि च शिक्षणविषये गभीरं विचारं कर्तुं सज्जाः ।

यदि जीवने किमप्युच्चतरं ध्येयं साधनीयं, जनोपयोगि वा किमपि कार्यं कर्तव्यं तदा शिक्षणं - वास्तवं शिक्षणं किमित्येतत् सर्वथा स्पषटतया पूर्णतया च ज्ञातव्यं बोद्धव्यं च, तदनु च तद्बोधानुसारमेव च विद्यालयादीनां संरचना कर्तव्या - इत्येतत् सर्वथाऽऽवश्यकमनिवार्यं चाऽपि । यदि वयमेतस्यां दिशि सज्जतयाऽग्रेसरीभवामस्तदैव शनैः शनैरस्माकं राष्ट्रेऽपि नालन्दा-तक्षशिलादिसदृशा विश्वविद्यालया पुनरपि विनिर्मीयेरन् पुनरपि च देशविदेशेभ्यो विद्यार्थिनां प्रवाहो भारतं प्रति प्रवहेत् ।

परन्त्वेतदर्थं मूलादेव विचारविमर्शं कृत्वा स्पष्टो बोधः प्राप्तव्य एव । स्पष्टो बोधो यदि प्राप्येत तदाऽर्धं युद्धं तु जितमेवाऽस्माभिः । यतो मूलं यदि दृढं स्यात् तदैव भवनं सुस्थिरं चिर-स्थायि च सम्भवेत् । किन्तु वयं भारतीया ह्यद्यत्वे विचारणमेव विस्मृतवन्त इति प्रतिभाति । ततश्च सम्यग्बोधो नैव प्राप्येत । फलतश्च विचाररहिता दिङ्मूढाश्च सर्वेऽपि वयं कुमार्गे विपरीतदिशि चैव प्रतिष्ठामहे । अतः स्पष्टो बोधः सर्वथाऽऽवश्यक एव, तदर्थं च विशदो विचारोऽपि करणीय एव ।

तत्र च, शिक्षणं यस्मै दातव्यं स मनुष्यः (विद्यार्थी) नैकेषां तत्त्वानां सम्मेलनमस्ति । तत्राऽपि द्वे तत्त्वे सर्वथा प्रकटिते प्रसिद्धे च - शरीरमन्तःकरणं च । शरीरं तु सर्वविदितमेव । अन्तःकरणं च - चित्तं,मनः, हृदयं, बुद्धिः,अहङ्कार इत्यादिभिः सञ्ज्ञाभिरस्माकं परिचितमेव ।

शरीरस्य यथायोग्यं शिक्षाभिर्व्यायामादिरूपाभिर्विकासनं शिक्षणस्य प्रथमं सोपानम् । एतच्च शिक्षणस्याऽतीव लघुर्भागो भवेत् । बृहद्भागस्त्वन्तःकरणस्य विकासः । तत्र, चित्त-मनसोः शुद्धीकरणं, सूक्ष्मीकरणं, स्थिरीकरणं, प्राञ्जलीकरणं चाऽऽवश्यकम् । एतेषु नैतिकमूल्यानि प्रेम-

क्षमा-सत्य-सन्तोष-परोपकारादीनि तु समाविष्टानि भवन्त्येव, सहैव निर्णयशक्तिः, कूटप्रश्ननिराकरणं, स्वक्षमतावर्धनं, संशोधनं, नवसर्जनं चेत्यादिकमपि समाविष्टं भवति । एतादृशा गुणा येन स्वजीवने प्रकटिताः स्युः स कदाऽपि हीनं दुष्टं वा कार्यं नैव कुर्यादन्येषां च सहायभूत आधारभूतश्च सन् तेषामपि पथदर्शको भवेत् । सहैव राष्ट्रस्य हिताय जनतायाश्चाऽपि हितायाऽग्रेसरो भूत्वा प्रवर्तेत ।

एतदेव शिक्षणस्य मौलं स्वरूपम् । किमेतादृक् शिक्षणं वयमस्माकं विद्यार्थिभ्यो दातुं बद्धकक्षा भविष्यामो वा ?

**शरत्पूर्णिमा, वि.सं. २ ०७५** **कल्याणकीर्तिविजयः**

**भावनगरम्**

# अनुक्रमः


| कृतिः | कर्ता | पृष्ठम् |
| --- | --- | --- |
| पञ्चपरमेष्ठिस्तुतिः | स्व.पू.आचार्यश्रीविजयधर्मधुरन्धरसूरयः | 1 |
| श्रीफलवर्द्धिपार्श्वनाथमाहात्म्यमहाकाव्यम् | वाचकश्रीसहजकीर्तिगणी | 2 |
| श्रीगौतमस्वामिस्तुतिः | मुनितारकचन्द्रसागरः | 11 |
| अभिराजगलज्जलिकात्रयम् | प्रा.अभिराजराजेन्द्रमिश्रः | 12 |
| सुभाषितानि | प्रा.वासुदेवः वि. पाठकः | 15 |
| वन्दे मे मातरम् | प्रा.वासुदेवः वि. पाठकः | 16 |
| ग्रन्थसमीक्षा | | |
| सूर्योदयं सूरिवरं प्रणौमि | कल्याणकीर्तिविजयः | 17 |
| आधुनिकहिन्दुविधिः | डा.रूपनारायणपाण्डेयः | 18 |
| कथा | | |
| भवनिस्तारकथा(चम्पूकथा) | मुनितारकचन्द्रसागरः | 20 |
| संस्कारप्रपा | मुनिअक्षयरत्नविजयः | 46 |
| भिक्षुः अखण्डानन्दः | मुनिराजयशविजयः | 49 |
| भक्तिभावः श्रेष्ठः | सा.ध्यानरसाश्रीः | 51 |
| रामो यं त्यजेत् तं का वा रक्षेत् ? | सा.हंसलेखाश्रीः | 53 |
| दृष्टिः | सा.तत्त्वनन्दिताश्रीः | 54 |
| समयस्य मूल्यम् | सा.श्रुतलोचनाश्रीः | 55 |
| स्थिरता | सा.निसर्गप्रज्ञाश्रीः | 57 |
| वेषस्य माहात्म्यम् | सा.निसर्गप्रज्ञाश्रीः | 58 |
| मर्म नर्म | कल्याणकीर्तिविजयः | 59 |
| प्राकृतविभागः | | |
| प्राकृतद्व्याश्रयमहाकाव्यम् (संस्कृतानुवादः) | पं.नरेन्द्रचन्द्र-झा | 60 |
| पाइयविन्नाणकहा | स्व.आचार्याः श्रीविजयकस्तूरसूरयः | 76 |

## आर्थिकसौजन्यम्

नन्दनवनकल्पतरोस्त्रयश्चत्वारिंश्याः शाखायाः प्रकाशनार्थं भावनगरसत्केन श्रीसीमन्धर-ट्रस्ट-(क्रेसन्ट)-इत्यनेन आर्थिकः सहयोगः कृतोऽस्तीति तदर्थं बहुशो धन्यवादाः ।।

# पञ्चपरमेष्ठिस्तुतिः

- स्व.आचार्याः
श्रीविजयधर्मधुरन्धरसूरयः

नमो जिनेशाय महेश्वराय,
संसारवारांनिधितारकाय ।
द्वेषात्मदावानलवारिदाय,
रागस्वरूपाब्दसमीरणाय ।।१।।
सिद्धाय बुद्धाय भवान्तकाय,
सिद्धीन्दिरावक्षसि कौस्तुभाय ।
कर्माष्टकाष्ठोज्ज्वलितानलाय,
नमोस्तु लोकाग्रसनातनाय ।।२।।
दुर्वादिवित्रासनसिंहकल्पान्,
श्रीतीर्थकृच्छासनवर्यकल्पान् ।
सङ्घोन्नतिं कुर्वत इष्टरूपान्,
सूरीश्वरान् नौमि विशिष्टभूपान् ।।३।।
अधीतजैनागमबुद्धबोधा,
विध्वस्तमिथ्यातिमिरावरोधाः ।
सदा प्रसन्ना वचनोच्चकेन्द्राः,
जयन्ति विश्वेश्वरवाचकेन्द्राः ।।४।।
मुनिः परः स्तौमि मुनिं सदर्थं,
मोक्षैकमार्गो मुनिना प्रवाहितः ।
नमोस्तु नित्यं मुनये मुनेः शं,
मुनेः परा चिन्नु मुनौ शमः स्यात् ।।५।।

*****

# श्रीफलवर्द्धिपार्श्वनाथमाहात्म्यमहाकाव्यम्

- वाचकश्रीसहजकीर्तिगणी

[ १ ]

## स्तुतिफलाविर्भावकः

### प्रथमः सर्गः

श्रीभर्तुर्धरणेन्द्रपद्मसवितुर्भव्यावलीरक्षितु -
हर्न्तुः कर्म्मततेर्विधातुरमरश्रीशान्तिमुक्तिश्रियाम् ।
नेतुर्गच्छपतेः प्रहर्तुरशिवासातस्य सातात्मनः
कर्तुं पार्श्वजिनेशितुः स्तुतिमहं यत्नं विधास्येऽभितः ।।१।।

प्रासादं यदि रोहति स्वयमसावभ्रंलिहं मानवः ।
श्रोणोऽहेर्वदनं चुचुम्बिषति ना मन्त्रादिहीनो यदि ।
पापो गच्छति मोक्षमक्षतकलिः श्लोकं यदि प्राप्नुयाद्
विश्वाधीशगुणस्तुतिं तव तदा कर्तुं समर्थः शठः ।।२।।

यद्येवं हि तथापि निर्गुणमतिः स्तोष्ये भवन्तं किल
प्रेक्ष्य प्राक्तनवृद्धसूरिरचनां स्तोत्रस्य तेऽनेकशः ।
अध्वज्ञोऽध्वनि याति निश्चलमनाः पृच्छँस्तथा ना परः ।
किं यातीह समीहितार्थघटना तुल्या भवेन्नोभयोः ।।३।।

दुःखानां च्युतिरस्मृतिः क्षितिततेर्व्युत्सृष्टिरापद्गतेः ।
सृष्टिः सर्व्वगुणस्य लब्धिनिकरस्याऽऽकृष्टिरत्युत्तमा ।
वृष्टिः पुण्यजलस्य केवलरमामृष्टिः सतां जायते
यस्यास्तां परमां स्तुतिं जिनपतेर्भक्त्या करिष्ये भृशम् ।।४।।

ऋद्धिं या कुरुते सुरा विदधते यां तां लभन्ते यया
यस्यै के स्पृहयन्ति नो भवजलं यस्यास्तरन्ति क्षितौ ।
यस्याः शक्तिरभूत् परा गुणगणो यस्यां श्रितः सम्मतः
सा जीयाद् महती सती गुणवती पार्श्व ! त्वदीया स्तुतिः ।।५।।

मुक्तिं केऽपि सुरेश्वरत्वमपि के सर्वार्थसिद्धिं च के
चक्रित्वं च तदर्धवैभवमपि ये प्राप्य स्तुतेस्ते जनाः ।

राजन्ते किमसौ विभिन्नफलदा जाता न चित्रं प्रभो !
यद्वा भूमिगता विचित्रफलदा तोयावली मेघजा ।।६।।

दादेति स्वधनं क्रियां सुविशदां यश्चर्करीति क्षितौ
वावक्ति प्रवरं वचः परधनं तो जर्गृहीति प्रियम् ।
पारक्यां न च वावशीति ललनां मूर्च्छां विदाधेति नो
द्रव्ये स्वेऽपि न बोभुजीति निशि यस्त्यक्ताभिलाषः सृतौ ।।७।।

वामेयस्तुतिमन्तरेण स जनः स्वार्थं न पूर्णं स्वकं
सासाधीति सुभिक्षमत्रि विपुलं वर्षां विना सत्स्वपि ।
पृथ्व्यां भूरिजलाशयेषु वचने काये तथा मानसे
ज्ञात्वैवं फलमुत्तमं स्तुतिविधौ जातोद्यमः साम्प्रतम् ।।८।।युग्मम्।।

स्वर्गो या परिरंरमीति विवरेऽप्याजङ्गमीति स्वतो
लोकेऽमुत्र सरीसरीति न कदा कुत्राऽपि जार्गृद्धि या ।
आनन्दं वितरीतरीति जगतो लालब्धि कीर्तिं परां
किं किं नाथ ! तव स्तुतेस्तनुधिया सद्वर्णनं वर्ण्यते ।।९।।

एतां प्राप्य जनो वृथा धनकृते देशान्तरं भ्राम्यति
कलाम्यत्यत्र कथं तनूद्भवकृते ताम्यत्यहो ! स्त्रीकृते ।
सर्वं यच्छति कामितार्थमचिरादेषा समासेविता
लोके कल्पलतेव सत्यवचनं जानीत भो ! मामकम् ।।१०।।

इति **श्रीसहजकीर्तियतीन्द्र**विरचिते **श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये** महकाव्ये
**स्तुतिफला**विर्भावकः प्रथमः सर्गः ।।

[२]

## देश-नगरी-भूप-राज्ञीवर्णनस्वरूपः

## द्वितीयः सर्गः

नामस्तुतिश्रवणमेव करोति सौख्यं
पापं क्षणोति चरितस्य कृतिस्तु दूरे ।
पीतिर्जलस्य तृषितस्य यथा जिनेश -
स्थाने जलस्रवणमेव समाधिहेतुः ।।१।।

एवं विमृश्य जिननायक ! तावकीनं
स्वस्मै हिताय विदितं चरितं करिष्ये ।
वाणिज्यमत्र वणिगेव यथैक्ष्य लाभं
किं किं जनो हितपरो न हितं करोति ? ।।२।।

जैनं चरित्रमिदमस्ति विचिन्त्य पूतं
श्रोतव्यमत्र विदुषां ननु नो शठोक्तम् ।
काचस्य खण्डमिव काञ्चनमध्यमग्नं
ग्राह्यं भवेत् सुमनसां तदभेदबुद्ध्या ।।३।।

ये दुर्धियो विपुलमत्सरिणोऽगुणज्ञा-
स्त्यक्ष्यन्ति काञ्चनमपि ते व्यतिरेकबुद्ध्या ।
अन्नं सुतृप्तिजनकं लवणैकदेशं
मन्दास्त्यजन्ति सुधियः पुनराद्रियन्ते ।।४।।

कासीति देश इह भारतवर्षमध्ये
गङ्गासरित् प्रतिदिनं यमसौ सिषेवे ।
मन्ये समृद्ध इति भावमुपागतेयं
तुष्टः परं किमपि मे परिदास्यतीति ।।५।।

वाराणसीति नगरी न गरीयसीति
यस्माज्जडं वहति नो सुधियो नरांश्च ।
अस्या विचिन्त्य परितः परिवेष्ट्य सेवां
गङ्गा करोति सततं परिनिर्जितेव ।।६।।

यद्वा महापुरुषयोनिरियं सदैव
प्रेक्ष्या मया सुकृतदा जलदेन काले ।
धौतक्रमाक्रमजलेन पवित्रिताङ्गी
यद्वा गतेन मयि तां भविताऽस्मि सेवे ।।७।।

अस्यास्तु सङ्गममहं सुतरमवाप्य
विश्वत्रयी सवनमाननपूजनाभिः ।
जाता प्रसिद्धिमतुलां किल तीर्थभूतां
सत्सङ्गमो भवति सत्फलदो हि नित्यम् ।।८।।

अश्वा रथाः करटिनो बहुपत्तयश्च
राजन्ति यस्य निलयेष्वथ नामधेयम् ।

भूपाश्वसेन इति रूढिवशाद् बभूव
नाऽन्वंथमर्थपरिवारविराजमानम् ।।९।।

भूतानि पञ्च जलदो रवि-सोम-भौमाः
सौम्यो गुरुः कवि-शनी शिखि-सैंहिकेयौ ।
सर्वेऽपि राजति नृपे समतामवापु-
राधिक्यहीनमपहाय गतेर्गुणानाम् ।।१०।।

वैरं कुमार्गगमनं धननाथ ईति-
र्वर्षात्ययः कुमतिरर्त्तिरनीतिबन्धः ।
मारिर्वियोग-कलहौ विविधाश्च रोगा -
स्तस्मिन् नृपे जगति शासति नाशमीयुः ।।११।।

पुत्री धनी वितरणी प्रशमी गुणी ह्री
धर्मी प्रसन्नहृदयी सुनयी विवेकी ।
तीर्थी परार्थविजयी सुमती जयी च
लोकोऽस्ति शासति नृपे न च नञ्समासः ।।१२।।

हिंसा हृषीकमनसो रसतो व्यलीकं
चौर्यं सदा परगुणस्य परिग्रहोऽपि ।
मिथ्यामतेरहरहः परिखण्डनं च
राज्यं प्रशासति नृपे सकृपे विदर्प्पे ।।१३।।

आजन्मतः सुमति-सद्गतिभागधेय -
लावण्यरूपघटना च कलाकलापः ।
तस्या विधूततमसोऽजनि वृद्धिमासीद्
वामेति नाम महिषी सुमुखी नृपस्य ।।१४।।

आजन्मतोऽपि तनुवाग् हृदयेषु यस्याः
साहाय्यमाप्य वसति स्म सुखं गुणानाम् ।
शीलं सलीलमतुलश्रि ततः प्रभुत्वं
लेभे स्वशक्तिवशतः सकलेषु तेषु ।।१५।।

इति **श्रीसहजकीर्तियतीन्द्र**विरचिते **श्रीफलवर्द्धिपार्श्वनाथ**माहात्म्ये महाकाव्ये
**देश-नगरी-भूप-राज्ञीवर्णन**स्वरूपो द्वितीयः सर्गः ।।

## [३]

## च्यवन-जन्म-सूर्योदयवर्णनात्मकः

## तृतीयः सर्गः

अथ नागपतिप्रणतो मरुतां, सुखतामनुभूय चिरं विरतः ।
जनितोत्तमतीर्थकरोच्चपदोऽजनि राजकुले विमले विमले ।।१।।

महिषीसुखगर्भगतः शुशुभे, सरसीतमराल इवाऽद्रितटे ।
सुरसाल इवोत्तमशुक्तिपुटेऽक्षतमौक्तिकवत् शुशुभे तविषे ।।२।।

धरणीरमणी नृपतेर्महिषी, तनये सनये परिवृद्धिमिते ।
गरभे ववृधे धन-सस्यगणैः, परिमुच्य विरोधमुक्तिभवम् ।।३।।

दिवसे दिवसे स्ववशं नयते, क्षितिमण्डलमत्तगजाश्व-रथैः ।
नृपचक्रमवक्रगतिः स्म नयी, सदयः सदयः सदयः सदयः ।।४।।

हृदये हितवृत्तिरृतं वचनेंऽहतिरुत्तमपाणिपुटे सुघटे ।
नृपतेरिह भूवलये सुयशो, रमते रमते रमते रमते ।।५।।

तरणावथ मेषमिते सवृषे, भपतौ च कुजे मकरं मिलिते ।
शशिजेऽत्र कनीं परिभुक्तवति, धिषणे शुभकर्कपथं प्रथिते ।।६।।

पृथुरोमरते किल दैत्यगुरौ, रविजे च तुलापरिभोगमिते ।
समये परिपूर्णनिशीथकले, परिवर्धितपुण्यमनोरथके ।।७।।

सकले सकलेऽपि समृद्धिमिते, सति राजकुले विपुले महिषी ।
असिते च सहस्यदिने दशमी, शुभनाम्नि सती सुषुवे तनयम् ।।८।।

पशु-नारक-पञ्चजना निमिषा, हृदयोत्थमलं सुखमापुरमी ।
भुवनं मुमुदे धन-धान्य-सुत-प्रकरोत्तमबन्धुरबन्धुजनम् ।।९।।

समदं रतिकेलिपरं विहगं, कृतकोककुलप्रमदप्रकरः ।
दिततामसलोकविचारपथः, पथिकप्रथितागमकर्मकलः ।।१०।।

विदधज्जिनपार्श्वमुखं विमुखं, भवतः किमु तक्षितुमस्तमलम् ।
दिनकृत्वमिति स्वकमर्थयुतं, कथयन्नभिधानमहीनरुचिः ।।११।।

कमलौघमलं सुपरागकलं, सलिलं च विसारकुलं सकलम् ।
गतनिद्रविकाशमुखं विदधत्, परितोषसुपोषवनं सघनम् ।।१२।।

कुवलं कुबलं परिशोकयुतं, कृतकौशिकपक्षपराभिभवः ।
कुरुते हि समर्थजनो निजकं, परकं सुसमृद्धिमवृद्धिपरम् ।।१३।।

अरुणाक्षमुखः प्रतिपक्षमिवोद्दलति स्म तमःप्रसरं वितमाः ।
उदयाद्रिगजं रविरात्तजयः, श्रयति स्म तदोषसि चाऽऽशुगतिः ।।१४।।

पञ्चभिः कुलकम् ।। तोटकच्छन्दः ।।

इति **श्रीसहजकीर्तियतीन्द्रविरचिते**
**श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये** महाकाव्ये
**च्यवन-जन्म-सूर्योदयवर्णनात्मकः**
तृतीयः सर्गः ।।

*****

[४]

## बालक्रीडावर्णनात्मकः
## चतुर्थः सर्गः

प्रातराशीर्वचःश्रेणिसज्जल्पनं, तूर्यघोषोद्भमं गीतगानप्रियम् ।
राजसद्म प्रभाप्रेमपात्रं बभौ, दीयमाना प्रमाणोत्तमस्पर्शनम् ।।१।।

ज्ञातपुत्रावतारोऽथ भूमीधवोऽमन्यताऽऽत्मानमुच्चैःफलप्रापिणम् ।
वृद्धशाखीव सम्पूर्णराज्यस्थितिर्नाऽस्ति पुत्रात् समं संसृतौ सत्फलम् ।।२।।

रत्नगर्भेति नामाऽजनिष्ट प्रियं, सार्थकं सद्धरावत् प्रमाणं मम ।
जातहर्षेति वामाऽपि भर्त्रा समं, नास्ति सूनोः समं भूषणं हि स्त्रियाः ।।३।।

दत्तपार्श्वेति नामा प्रभुः प्रत्यहं, वर्धमानः प्रमोदेन पित्रोरिव ।
निर्जरालीभिरङ्काङ्कमध्यस्थितः, कल्पवृक्षो यथा पञ्चभिर्मातृभिः ।।४।।

केलिभिः क्रीडति स्माऽऽत्मतुल्यैः समं, बालकैर्बालभावो न चाऽस्ति प्रभौ ।
ज्ञानरत्नत्रयाली न पुण्यात्मनि, प्रेम पित्रोः परं वर्द्धतां केवलम् ।।५।।

घुर्घरीणां क्रमस्थायिनीतं रवो, मातृ-पित्रोर्मुदं सन्तताऽनाऽधिकाम् ।
मोहराजः प्रभोरग्रतः स्म च्छलं, संविधाय स्वकं वीर्यमाज्ञीप्सति ।।६।।

अर्भकं क्रोडदेशे समेतं प्रसूः, रन्तुकामं चुचुम्ब स्मितं हर्षभाक् ।
ज्ञातमेतत् प्रभुर्मोहदस्युं स्वयं, प्राप्नुवन्तं हसत्येव तं तं क्षणम् ।।७।।

जातु बालं विभूष्याऽमितैर्भूषणैः, स्कन्धमारोप्य च क्रीडयन्ति स्म तम् ।
ज्ञापयन्त्यो जनान् पुण्यमच्छं यशो, भूधवस्याऽस्य वंशस्य सन्मूर्तिमत् ।।८।।

जातु तं बालकं स्वर्णभूषावृतं, राजदन्तावलस्योत्तमाङ्गस्थितम् ।
राजमार्गे भ्रमन्तं नदत्तूर्यकं, नागरं नागरा एवमस्ताविषुः ।।९।।

धायिनं शुद्धरत्नत्रयस्याऽधिकं, त्रायिणं सत्त्वसङ्घस्य संयायिनम् ।
मोक्षसौख्याध्वनः सायिनं कर्मणां बालपर्यायिणं त्वां सुसेवामहे ।।१०।।

- स्रग्विणीच्छन्दः ।।

बालक्रीडामपरिमितिकामेवमादर्श्य पित्रो -
मोहस्पर्शां समयरसिकां लौकिकाचारवृत्तिम् ।
कान्ता कान्तं मदनजननं लब्धलावण्यभोगं
सीमायातं कमनशमनो यौवनं प्राप नाथ ।।११।।

इति **श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये** महाकाव्ये

**बालक्रीडावर्णनात्मकश्चतुर्थः** सर्गः ।।

## [५]

## यौवनवर्णन-तत्समयाचारवर्णनात्मकः

## पञ्चमः सर्गः

विलोक्य क्षमानायकं मोहवप्तु-
र्द्विषं शङ्कमानो जगामाङ्गमध्यम् ।
प्रभोर्यौवनाक्रान्तचित्तो मनोजः
स्फुरन्मन्त्रिणो मन्त्रहूतो यथाऽहिः ।।१।।

वपुर्नेत्रयुग्मं गतिं वक्रमक्ष-
व्रजं मन्मथो वीर्यशक्त्या सरन्त्याम् ।
प्रभोर्दीपयामास दीप्तान्यपीत्थं
रसोपेतसस्यं यथा मर्त्यलोके ।।२।।

इदं कार्यमेतन्न कार्यं न पेयं
तथा पेयमेतन्न गम्यं च गम्यम् ।
न योग्यं तथा योग्यमेतन्न हेयं
तथा हेयमित्यादिका लोकनीतिः ।।३।।

समेते मनोजे हृदि प्राणभाजां
चिरान्नं न शीतीव मद्ये विपीते ।
परं वीतसङ्गस्य सङ्गं प्रपन्नो
यथा तीर्थनाथस्तथा चाचलीति ।।४।।

कुमारे स्फुरद्यौवने द्यूतमांसे
सुरापान-वेश्यागमौ प्राणिहिंसाम् ।
परस्त्रीरतिं चौरकर्माऽन्यनिन्दां
पुरे विप्रलम्भं परच्छिद्रवृत्तिम् ।।५।।

कुनीतिं कुवृत्तिं कराधिक्यदानं
मिथः कूटसाक्षित्वमल्पाधिकं च ।
परद्रव्यरक्षापहारं च लोको
न कर्तुं क्षमश्चेतसाऽपि प्रमादात् ।।६।।

कुमारेण दृष्ट्वा पुरं वीक्ष्यमाणं
सुधावृष्टिसृष्ट्या तरां वर्वृधीति ।
प्रशस्यं यथा क्षेत्रमासारपूर्णं
धनेनाऽऽशु पुण्याम्भसा पूरितेन ।।७।।

तदा तापसो दुस्तपा दुष्टकर्मा
कठाख्योऽक्षमापूर्णगात्रः समेतः ।
पुरीकानने लोकवर्गोऽनुयातो -
ऽभिनन्तुं कुमारोऽपि मात्राग्रहाच्च ।।८।।

ज्वलत्किंकुलं दन्दशूकस्य दृष्ट्वा -
ऽवधिज्ञानतो जातशूकः स्वयम्भूः ।
प्रदर्श्याऽशुभोऽयं जनस्येति दुष्टो -
ऽकरोन्नागराजं महामन्त्रशक्त्या ॥९॥

कुमारं पदं भूषयन्नेवमेवं
परस्योपकारानेकांश्च कुर्वन् ।
क्षमामण्डले कीर्तिमालां विशालां
कुमारो बभाज प्रियां कण्ठपीठे ॥१०॥

- भुजङ्गप्रयातच्छन्दः ॥

इति **श्रीसहजकीर्तियतीन्द्रविरचिते**
**श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये** महाकाव्ये
**यौवनवर्णन-तत्समयाचारवर्णनात्मकः** पञ्चमः सर्गः ॥५॥

******

# श्रीगौतमस्वामिस्तुतिः

- मुनितारकचन्द्रसागरः

सुरगिरिसमधीरं सागराओ गभीरं,
ससधरसमसोम्मं तेयठाणं पवित्तं ।
सुजणकमलभाणुं दोसनासट्ठवज्जं,
सुमरिमु सिरिसामिं गोयमं लद्धिजुत्तं ।।१।।

जिअसयलसिलाहं वद्धमाणस्स सीसं,
पढमगणहरं तं सोम्मकंतीएँ जुत्तं ।
सयलभविजणाणं कप्परुक्खं व सक्खं
सुमरिमु सिरिसामिं गोयमं लद्धिजुत्तं ।।२।।

मणवयसिरसा भो पूजिरे भत्तिजुत्ता
परमसिवसुहं ते पाविरे जे णर त्ति ।
तवबलसिरिमंतं सव्वलद्धीण सामिं
सुमरिमु सिरिसामिं गोयमं लद्धिजुत्तं ।।३।।

वरविउससहाए से किवा होइ भव्वे,
लहइ विजयसिद्धिं सव्वरिद्धिं समिद्धिं ।
सयलकुसलवल्लीवद्धणे मेहतुल्लं,
सुमरिमु सिरिसामिं गोयमं लद्धिजुत्तं ।।४।।

निर्नाशयन् यः कुविकारपापं,
प्रणाशयंश्चाशु भवस्य तापम् ।
विकासयन्नात्मनि शुद्धभावं
स्मराम्यहं तं गुरुगौतमं हि ।।५।।

*****

# अभिराजगलज्जलिकात्रयम्

- प्रा. अभिराजराजेन्द्रमिश्रः

## १. अभिराजगलज्जलिका

इदमासि दर्शनं नो, नैवाऽस्ति मन्त्रदीक्षा
वैपर्ययी कबीरी[१], अभिराजगलज्जलिका ।। १

यद्यात्मनेपदत्वं बुध्यसि, निजं विशोधय ।
गाङ्गं जलं पवित्रम् - अभिराजगलज्जलिका ।। २

शब्दच्छलं न चार्थच्छलनेव सम्प्रयुक्तम् ।
तूनं मुखस्फुटत्वं, अभिराजगलज्जलिका ।। ३

ननु भुक्तमेव गीतं, प्रोक्तं च सोढमेव ।
न च गोपितं रहस्यं, अभिराजगलज्जलिका ।।४

स्वादादृते न किञ्चित्, मूकस्य यथा माध्वी ।
आस्वाद्यमप्यवाच्यम्, अभिराजगलज्जलिका ।।५

कांश्चिद् दुनोति कशया, तृषया विनक्ति कांश्चित् ।
कांश्चित् पृणक्ति सुधया, अभिराजगलज्जलिका ।। ६

व्यर्थं विरच्य नो वै, शब्देन्द्रजालमेषा ।
उद्वेजयति नवीनान्, अभिराजगलज्जलिका ।।७

नेयार्थता न चास्यां, च्युतसंस्कृतेर्न दोषः ।
ऋगियं न सामधेनी, अभिराजगलज्जलिका ।।८

अनुशील्य यां निमेषैः सत्त्वं झटित्युदेति ।
तिष्ठति तमः प्रलीनं, अभिराजगलज्जलिका ।।९

सारस्वतं तपो यत्तप्तं नृणामरण्ये ।
कविना, तदाप्तिरेषा, अभिराजगलज्जलिका ।। १०

---

१. कबीर की उल्टवाँसी

*****

# २. श्रयते शून्यं व्योमतलम्

वृन्तासक्तं भवति फलम्
वसुधासक्तं भवति जलम् ।।१।।

पुष्करिणीवक्षसि स्तृतम्
विकसति रक्तपीतकमलम् ।।२।।

आधारेऽधिकरणयुतम्
आधेयं तदुपरि शबलम् ।।३।।

स्वाधारे स्थितिमन्निखिलम्
न निराधारं किमप्यलम् ।।४।।

ग्रहा लम्बिता दृश्यन्ते
तेषामपि कक्ष्यैव फलम् ।।५।।

पिपीलिका वा महीधरः
उभयोरेव हि तुल्यबलम् ।।६।।

हाला मदयति यथा नरम्
तथा हन्ति हालाङ्कहलम् ।।७।।

कियद्विचित्रः संसारः
समाश्रयति यो भूमितलम् ।।८।।

कियद्विचित्रा धराऽप्यहो
श्रयते शून्यं व्योमतलम् ।।९।।

*****

# ३. सन्ध्या ममाऽप्याह्लादिनी

क्षीयेत दुःखं वा न वा, संक्षीयते ननु यामिनी
वर्षेत् पयोदो वा न वा, देदीप्यते खलु दामिनी ।।१।।

स्युर्वा न वा प्रतितरु फलानि पचेलामनि वने वने
तनुते वसन्तागममहो कूजनपरा पिकभामिनी ।।२।।

कामं घनच्छन्नार्कतः सन्ध्याऽरुणा न विचीयताम्
गृष्टिर्न किं तां वक्त्यहो हम्भारवैर्वात्स्यायनी ।।३।।

आत्मानमव भद्राऽग्निमित्र विहाय मालविकामिमाम्
पुनरेति दयमाना भवन्तमिहैव देवी धारिणी ।।४।।

त्वच्छागतां कण्ठीरवत्वैश्छादितुं ते सोद्यमाः
किन्त्वस्ति मेऽकिञ्चित्करस्य शिवैव मङ्गलकारिणी ।।५।।

या भस्मनो निस्सार्य षष्टिसहस्रकान् दिवमापयत्
सा जाह्नवी जननी भविष्यति किं ममाऽपि न तारिणी ।।६।।

सन्त्वेव काञ्चनकामिनीप्रभृतीनि तेषां भूतये
मम धीः परन्तु दिवानिशं कवितानिकुञ्जविहारिणी ।।७।।

नेयं तुरुष्कगलज्जला दाम्पत्यरत्याभासिनी
इयमस्ति गोमुखनिर्गता सुरसरिद्रत्यास्वादिनी ।।८।।

व्यतियान्ति दिवसाः कथमहो तेषां कुबेरभुवामिमे
इत्येव पश्यत आगता सन्ध्या ममाऽप्याह्लादिनी ।।९।।

*******

# सुभाषितानि

- डो.वासुदेव वि. पाठकः 'वागर्थः'

विवेकेन विचार्यैव,कर्तव्यं वृद्धिमिच्छता ।
सुज्ञत्वेन सुसम्पन्नः, समयस्स्वसहायकः ।।
सौमनस्ये सदा धर्मः, वैमनस्ये ह्यधर्मता ।
मूलतो मृत्तिका ज्ञेया, नानाकारेषु सर्वथा ।।
धन्या जीवनरीतिः कार्या, प्रणतिस्सदा सर्वदा सेव्या ।
व्यवहारे परमार्थे चैवं, प्रणतिः परमोत्कर्षा पुण्या ।।
मनसश्च शरीरस्य, स्वास्थ्यं मोदकरं भवेत् ।
मनः पूतं प्रियं कार्यं, भवेल्लोकोपकारकम् ।।
स्मारं स्मारं गुणान्पुण्यान्, यस्य कस्याऽपि भावतः ।
पवित्रं करणीयं स्याद् , अस्मज्जीवनमादरात् ।
श्रोतव्यं प्रथमं पुण्यं, सुमतं हि निजात्मनः ।
श्रुत्वा तदवगन्तव्यम्, सर्तव्यं च तथानुगम् ।।
सुभाषितेन गीतेन, सङ्गीतनर्तनादिकैः ।
द्रवते यदि चित्तं नः, पावित्र्यं मोददं भवेत् ।।
देहे मनसि गेहे च, विस्तारे नगरे तथा ।
राष्ट्रे तथैव विश्वे च, व्याप्या सर्वत्र स्वच्छता ।।
देववत्वाराधना श्रेष्ठा, श्रेष्ठं नियमपालनम् ।
व्यवहारश्च सत्येन, विकासार्थं स्वजीवने ।।
संस्कारेण विना नैव, सहकारस्य भावना ।
सहकारं विना नैव, ह्युत्कर्षः कस्यचिद्भवेत् ।।
वन्दे विद्याप्रियान्वन्द्यान्, शास्त्ररक्षणकोविदान् ।
सततं सत्त्वसन्निष्ठान्, संस्कृत्यास्समुपासकान् ।।
नमः श्रीपरमेशाय, सर्वेष्टाय नमो नमः ।
सत्त्वतत्त्वस्य लब्ध्यर्थं, देशिकाय नमो नमः ।।
विभाजितं करोत्येव, कर्तरी स्वस्वभावतः ।
सन्धानं साधयत्येव, सूचिः सूत्रसमन्विता ।।

जीवनं जलवत्कार्यं, प्रवहन्तं च शैत्यदम् ।
जीवनं जडवत्स्याच्चेद्, दुर्गन्धं जनयिष्यति ।।
किञ्चिदुष्णोदकं प्रातस्तक्रं च भोजनान्तरम् ।
रात्रौ दुग्धे हरिद्रा च, स्वास्थ्यार्थं सेव्यते बुधैः ।।

*****

# वन्दे मे मातरम् ।।

- डो.वासुदेव वि. पाठकः 'वागर्थः'

वन्दे मे मातरं, भारतीं मातरम् ।
भद्रभद्रतायुतां, भा-रतां मातरम् ।।

आसेतु-हिमाद्रिं, भारतीं मातरम् ।
आद्वारिका-पुरीं, रमणीयां मातरम्;
वन्दे मे मातरम् ।।

रामकृष्णशिवशक्तिसम्पन्नां मातरम् ।
राष्ट्रभक्तिसम्पन्नैः, सेवितां मातरम्;
वन्दे मे मातरम् ।।

बुद्धमहावीराद्यैः, लोकहितार्थं सदा,
तपसा च त्यागेन, संपुष्टां मातरम्;
वन्दे मे मातरम् ।।

कोटिकोटिसुज्ञैश्च, संस्कृतेन संस्कृताम्,
पुण्यपथप्रदर्शिकां, कमनीयां मातरम् ।।
वन्दे मे मातरम् ।।

******

**ग्रन्थसमीक्षा**

# सूर्योदयं सूरिवरं प्रणौमि

लेखकः – मुनिः अक्षयरत्नविजयः

प्रकाशिका – श्रीधर्मकृपा संस्था, दर्भावती

प्रकाशनवर्षम् – वि.सं. २०७५

मूल्यम् – नैव निर्दिष्टम्

युगदिवाकराचार्यभगवतां श्रीविजयधर्मसूरीश्वराणां सच्छिष्याः पूज्याचार्या श्रीविजयसूर्योदयसूरीश्वराः समजायन्त । तेषां जीवनचरितं विविधायामैरस्मिन् ग्रन्थे समालिखितमस्ति तेषामेव प्रशिष्येण मुनिवरेण श्रीअक्षयरत्नविजयेन ।

अत्र पञ्चदशसु परिच्छेदेषु चतुरशीत्या प्रसङ्गैश्च सूरिवराणां जीवनस्य बहव आयामाः प्रकटिताः सन्ति मुनिवरेण । मुनिवरस्य लेखनकार्यं गूर्जरभाषायां यथा तथा संस्कृतभारत्यामपि सर्वथाऽनर्गलं प्रचलति । अद्यावधि त्रयो ग्रन्थास्तेन विरचिताः सन्ति, अयं तु तत्सकाशात् प्राप्यमाणश्चतुर्थो ग्रन्थोऽस्ति । तदीया भाषा, शैली, वर्णनरीतिश्च सुतरां श्लाघनीया । अल्पे एव वयसि तेन यज्ज्ञानार्जनं कृतं तद्विनियोगश्चाऽपि विहितस्तत्सर्वं सर्वथाऽनुमोदनीयमस्ति । वयमाशास्महे यदग्रेऽपि संस्कृतसाहित्यस्य वैभवं विभ्राजयन्तो ग्रन्थास्तत्सकाशात् प्राप्येरन् ।

*******

**ग्रन्थसमीक्षा**

# आधुनिकहिन्दुविधिः

## (धर्मशास्त्रीयविधिसहितः)

- डा. रूपनारायणपाण्डेयः

**लेखकः** - प्रो.डा. वेदप्रकाश उपाध्यायः

**प्रकाशकः** - जी. एच. पब्लिकेशन, इलाहाबाद

१२१, शहराराबाग, इलाहाबाद -मो. ९५३२४९१२०५

**संस्करणम्** प्रथमम् ई.२०१८। **पृ.सं.** २९९। **मूल्यम्** - ७५०/-

वेदा स्मृतयो निबन्धग्रन्थाश्च हिन्दुविधेः प्रमुखस्रोतांसि सन्ति। साम्प्रतं हिन्दुविधेर्यानि स्रोतासि समुपलभ्यन्ते, तानि सर्वाणि समीक्ष्य विद्वद्वरेण डा.वेदप्रकाश-उपाध्यायेन **'आधुनिकहिन्दुविधिः' (धर्मशास्त्रीयविधिसहितः)** इति ग्रन्थः प्रणीतः।

अस्मिन् ग्रन्थे द्वादशाऽध्याया विलसन्ति। प्रथमेऽध्याये विधेरवधारणा, विधिशासनं, नैतिकता, विधेः सर्वोपरित्वं, विधेः श्रुतिमूलकत्वं चेति विषया विचिन्तिताः। द्वितीयेऽध्याये हिन्दुविधेः स्रोतांसि वर्णितानि। तृतीयेऽध्याये विवाहविधेरवधारणा विवेचिता। चतुर्थे-ऽध्याये दत्तकग्रहणं विचारितम्। पञ्चमेऽध्याये दत्तकग्रहणपरिणामः प्रस्तुतः। षष्ठेऽध्याये उत्तरजीवितोत्तराधिकारश्च चिन्तितौ। सप्तमेऽध्याये संयुक्तपरिवारः, सहदायिकी सम्पत्तिः, स्त्रीधनं नारीसम्पच्चेति विषया विशदीकृताः। अष्टमेऽध्याये विभाजनं विस्पष्टीकृतम्। नवमेऽध्याये दानम् इच्छापत्रं धर्मदायश्चेति विषयाः समीक्षिताः। दशमेऽध्याये ऋणम् अविभाज्यसम्पदा च स्पष्टीकृते। एकादशेऽध्याये अवयस्कता संरक्षकता च सम्प्रस्तुते। द्वादशेऽध्याये भरणपोषणं वर्णितम्। उपसंहारे च विषयस्य मूल्याङ्कनं विहितम्। ग्रन्थादौ विदुषां सम्मतानि, लेखकस्य परिचयः, प्रस्तावना च शोमन्ते, ग्रन्थान्ते च राजते सहायक-ग्रन्थसूची।

श्रुति-स्मृतिनिबन्धग्रन्थेषु ये विधयः प्रतिपादिताः परम्परया चाऽङ्गीकृताः सन्ति, तेषां सम्मतावाधुनिकहिन्दुविधेर्विवेचनमस्य ग्रन्थस्य प्रणयनस्य प्रमुखमुद्देश्यमस्ति। तद्यथा - ग्रन्थकारः प्रस्तावनायां स्वयं निगदति - 'आधुनिकाधिनियमितहिन्दुविधेर्मूलं वेदेषु धर्म-शास्त्रेषु धर्मशास्त्रीयव्याख्याग्रन्थेषु चोपलभ्यते। धर्मशास्त्रालोके आधुनिकहिन्दुविधे-रनुशीलनमपेक्षितमित्यवधार्य एष ग्रन्थः प्रणीतः'। (पृ.१६) अनुशीलनेऽस्मिन् ग्रन्थकारस्य भूरिपरिश्रमः पदे-पदे दृश्यते। वेदान् विहायाऽपि धर्मसूत्राणां स्मृतीनां पुराणानां निबन्ध-

ग्रन्थानां च विपुला सम्पत्तिर्विराजते । तान् ग्रन्थान् सम्यग् वीक्ष्यैव कोऽपि जनः '**आधुनिक-हिन्दुविधेः**' समीक्षणं कर्त्तुं शक्नोति ।

यद्यपि ग्रन्थेऽस्मिन् धर्मशास्त्रोक्ता विधय एकस्मिन् स्थले नैव सन्ति सङ्कलिताः, तथाऽपि तेषां सन्दर्भा यथास्थानं, प्रायशः सर्वत्र प्रस्तुता शोभन्ते । तद्यथा - "हिन्दुविधिशास्त्रे दानमार्गः चतुर्विधः प्रोक्तः- १-देयम् २-अदेयम् ३-दत्तम् ४-अदत्तम् ।

१-**देयम्** - दाने दीयमाना सम्पत्तिर्देयशीर्षकान्तर्गता भवति । मिताक्षरायामुक्तम् - 'एवमात्मीयं कुटुम्बानुपरोधेन, कुटुम्बावशिष्टमिति यावत्, तद्दद्यात् तद्धरणस्याऽऽवश्यकत्वात्' **मिताक्षरा**(याज्ञवल्क्य.२।१७५) । एतदेव **याज्ञवल्क्यस्मृतौ** उक्तं - 'स्वं कुटुम्बाविरोधेन देयम्' (याज्ञवल्क्य.२।१७५) । नारदेनाऽपि कुटुम्बभरणावशिष्टा सम्पत्तिर्देयशब्देनाऽभिहिता भवति । तेनोक्तं - 'कुटुम्बभरणाद् द्रव्यं यत्किञ्चिदतिरिच्यते तद् देयम्' । पुरातन-काले भूमेरदेयत्वमेवाऽऽसीत् । जैमिनि-मीमांसासूत्रस्य शाबरभाष्ये उक्तं - 'न भूमिर्देयेति' । याज्ञवल्क्यस्मृतौ भूमेर्देयत्वं प्रतिपादितम् । उक्तं हि तत्र - 'दत्त्वा भूमिं निबन्धं वा कृत्वा लेख्यं तु कारयेत् ।' (याज्ञवल्क्यस्मृतिः१।३१८)" (**आधुनिकहिन्दुविधिः** पृ.२०४-२०५) ।

आधुनिकहिन्दुविधिः समग्रतया धर्मशास्त्रेषु प्रतिपादितान् विधीन् नाऽनुसरति । समीक्षानन्तरं ग्रन्थकारो विषयमूल्याङ्कने यद् वदति तत् सत्यमूलकमेवाऽस्ति । 'हिन्दुविधि-रुपबन्धस्रोतांसि धर्मशास्त्रीयग्रन्थेषूपलभ्यन्ते । अधुना तु हिन्दुविधेर्वर्तमानं स्वरूपं मौलिक-स्वरूपतात्पर्यरूपेण पृथग्भूतमाङ्ग्ल-रोमन-मुस्लिमविधिभिर्वैशिष्ट्येन प्रभावितत्वात् । हिन्दुविधिस्वरूपं भारतवर्षे आङ्ग्लशासनकाले परिवर्तितम्, आङ्ग्लविधेर्हिन्दुविधौ समावेशादाङ्ग्लशासकैः' । (**आधुनिकहिन्दुविधिः**, पृ.२७१) । ग्रन्थेऽस्मिन् को हिन्दुः? - इति तथ्यं नैव विशदीकृतम् । हिन्दुधर्मे वर्णाश्रमव्यवस्था महीयसी विद्यते, किन्त्वस्या नैवाऽस्ति कश्चिदपि समुल्लेख आधुनिकहिन्दुविधौ । धर्मसूत्राणां पुराणानां स्मृतीनां धर्मशास्त्रीय-निबन्धग्रन्थानां वैतिहासिकक्रमो नाऽत्राऽचिन्त्यत । मन्ये श्रुतिग्रन्थानां रचनाकालो विवादास्पदं वर्तते, किन्तु चतुर्वर्गचिन्तामणि-वीरमित्रोदय-निर्णयसिन्धुप्रभृतिग्रन्थानां रचनाकालो निश्चित एव ।

अस्य ग्रन्थस्य मुद्रणं नितरां शुद्धमस्ति । मुद्रणस्खलितानि प्रायशो नैव सन्ति । नवतितमे पृष्ठे याज्ञवल्क्यस्मृतेः सन्दर्भनिर्देशस्त्रुटिपूर्णो विद्यते । अयं ग्रन्थो न केवलं विधिज्ञानां कृते, अपि तु समेषां संस्कृतज्ञानां, विशेषेण च न्यायक्षेत्रे निरतानां विदुषां कृतेऽतितरामुपयोगी विद्यते । जयतु संस्कृतं संस्कृतिश्च ।।

*मनी का पूरा (चाँदपुर) सोराम, प्रयागराजः, उ.प्र. २१२५०२*

*****

# भवनिस्तारकथा

- मुनितारकचन्द्रसागरः

## भीमं भवकाननम्

अयोध्यानामकं ह्यत्र, नगरं विद्यते वरम् ।
धर्मिचेतश्चमत्कार-पदमद्भुततास्पदम् ।।१।।

धनधान्यादिसमृद्धं, विद्या-वाणीमनोरमम् ।
आस्थानं न्यायधर्मस्य, संस्थानं धर्मचारिणाम् ।।२।।

निर्झर-सरिता-शैल-वनोद्यान-परीवृतम् ।
श्रीफल-चूत-पुन्नाग-कदली-वृक्षमण्डितम् ।।३।।[ त्रिभिर्विशेषकम् ]

तच्च -

नगरं शोभते क्ष्मायां, शिखरे कलशो यथा ।
अस्ति तिलकवद्भूमि-लक्ष्म्या ललाट-मण्डनम् ।।४।।

मूर्खोऽपि पटुतां याति, तत्र विद्यालये पठन् ।
जायते शास्त्रविच्छ्रेष्ठः, विबुधैः परिकर्मितः ।।५।।

त्रिरूपः पुरुषार्थोऽत्र, त्रिमूर्तिवद् विराजते ।
दान-भोगोपभोगैश्चः, लक्ष्मीदेवी सुशोभते ।।६।।

उद्यानेऽत्राङ्गना भान्ति, नन्दनवन-सदृशे ।
मदोन्मत्तेभ-गामिन्यः, सुगन्धि-पुष्प-मण्डिते ।।७।।

अत्र च - ध्यान-तपोबलर्द्धिका, विद्याजङ्घादिचारणाः ।
लोकत्रये हि निर्बाधाश्चरन्तीव गृहाङ्गणे ।।८।।

सुवर्ण वस्त्र-धान्यानां, वाणिज्यादत्र सर्वदा ।
व्यवसायिजनाः सद्यो, लभन्ते कोटिमुद्रिकाः ।।९।।

अत्र सुगमसोपाना, निर्मल-जल-संभृताः ।
शतशो वापिकाः सन्ति, क्रीडोद्यानेन संयुताः ।।१०।।

लक्ष्मी-विष्णु-महादेव-बौद्धानामर्हतां तथा ।
राजन्ते मन्दिराण्यस्मिन्, सुरलोकविमानवत् ।।११।।

तथा चाऽत्र -

सप्तव्यसनतो मुक्ताः, युवानो धैर्य-धारिणः ।
राष्ट्रभक्ति-परा वीरा, जनकाज्ञानुयायिनः ।।१२।।

रोगातङ्कादनानन्दि-जना वैद्यप्रभावतः ।
सुवर्णवर्णिनो भूत्वा, वसन्त्यत्र प्रमोदतः ।।१३।।

मन्येऽत्र याज्ञिका नित्यं, जगतां शान्तिहेतवे ।
मन्त्रानुद्घोषयन्तीति; 'स्वस्ति स्वाहा स्वधा नमः' ।।१४।।

उत्तुङ्गः श्यामवर्णीयो, रक्षकै रक्षितः सदा ।
प्राकारश्चात्र दुर्लङ्घ्यः, परितः परिखावृतः ।।१५।।

उदारचित्तदातारो, याचकानामभावतः ।
पुरेऽस्मिन् दुःखिनः सन्ति; यतः सर्वेऽत्र सुखिनः ।।१६।।

दुष्टानां दमने भीमः, कान्तश्च धर्मकर्मिषु ।
वीरसेनाऽभिधः श्रेष्ठो, नृपोऽत्र शासकः सुधीः ।।१७।।

तस्याऽस्ति भव्य-प्रासादः, श्वेतपाषाणनिर्मितः ।
निवासो भारतीलक्ष्मी-देव्योरिव स दृश्यते ।।१८।।

अन्तःपुरेऽस्य साम्राज्ञी, स्वामिसेवानुगामिनी ।
शोभते शील-शृङ्गारा, पद्मिनी नामतः शुभा ।।१९।।

सा च कीदृशी ? - उक्तं चाऽन्यत्र पद्मिनी-लक्षणम्

भवति कमलनेत्रा, नासिकाक्षुद्ररन्ध्रा,
अविरलकुचयुग्मा, चारुकेशी कृशाङ्गी ।
मृदुवचन-सुशीला, गीतवाद्यानुरक्ता;
सकलतनसुवेशा, पद्मिनी पद्मगन्धा ।।२०।।

पद्मिनी-लक्षणा राज्ञी, रूप-लावण्यधारिणी ।
एकदा स्वप्नमैक्षिष्ट, निशाशेषे शुभोदया ।।२१।।

तमो-विलीनीकुर्वन्तं, चकासद्-दन्त-पङ्क्तिभिः ।
गर्जनेन दिशाः सर्वाः, कम्पयन्तं वनेश्वरम् ।।२२।।

निर्मल-स्वर्ण-वर्णीयं, प्रेक्षणीयं समन्ततः ।
जिह्वां विलोलयन्तं वै, रक्तवर्णात्मिकां मुहुः ॥२३॥

सर्वलक्षण-संपन्नं, नेत्रानन्दकरं वरम् ।
शौर्य-पराक्रम-पुञ्जं, सौम्यमेकं मृगेश्वरम् ॥२४॥

श्रेष्ठं पञ्चाननं स्वप्ने, चित्तचमत्कृतिप्रदम् ।
स्ववक्त्रकन्दरायां तु, प्रविशन्तं ददर्श सा ॥२५॥[ चतुर्भिः कुलकम् ]

स्वप्नं संप्रेक्ष्य जागर्ति, स्मारं स्मारं पुनः पुनः ।
सा च रोमाञ्चिता जज्ञेः, शुभभावान्विता तदा ॥२६॥

उक्तं च - सुस्वप्नदर्शनाद् भव्य !, श्रेयोऽस्ति शयनं न हि ।
अर्हतां ध्यानतः स्वप्नं, याति सफलतां ध्रुवम् ॥२७॥

इति सूक्त्यनुसारेण, सा पुण्यशालिनी मुदा ।
प्रातः सूर्योदयं यावद्, ध्यायति स्म जिनेश्वरम् ॥२८॥

ततः प्रातः समुत्थाय, स्वामिनमुपगच्छति ।
नत्वा विनयभावेन, दृष्टं स्वप्नं जगाद सा ॥२९॥

चिरं जीवतु हे स्वामिन् !, जयतात् त्वं सदा भुवि ।
निशीथिन्यां मया दृष्टं, स्वप्नं रोमाञ्चकारकम् ॥३०॥

इत्थमावेदितं राज्ञ्या, स्वामिने धर्मबुद्धये ।
वक्ति भूपोऽपि तच्छ्रुत्वा, प्राणप्रिये ! शृणु मुदा ॥३१॥

पूर्णे काले पुत्ररत्नं सुलक्षणं प्रसोष्यसे ।
समन्वितं गुणौघैश्च, सिंहवद् मानवेषु हि ॥३२॥

श्रुत्वा स्वप्नफलं भव्यं, स्वावासं सा जगाम च ।
कुलवृद्धाशिक्षया नु, करोति गर्भ-पालनम् ॥३३॥

पुरन्ध्री-हृदयाम्भोजे, समुद्भवन्ति दोहदाः ।
गर्भपुण्यप्रभावेन, शुभानुबन्धिनः शुभाः ॥३४॥

उक्तं च - जगति महतां पुण्य-प्रभावो गर्भतः खलु ।
निश्चितेन स्फुरत्येव, प्रकृष्टपुण्यशालिनाम् ॥३५॥

राज्ञ्या इच्छानुलोमेन, भूपोऽपि यतते सदा ।
"न पिपर्ति प्रियेच्छां नु, सामर्थ्ये सति कः पुमान्?" ॥३६॥

गमयामासतुः कालं, तौ सुखेन समाधिना ।
मासास्तु दिनवज्जाताः, "कालस्य त्वरिता गतिः" ।।३७।।

पूर्णराकेन्दुवद् वक्त्रं, चक्रादिलक्षणान्वितम् ।
साम्राज्ञी सा यथाकालं, प्रसूते स्म वरं शिशुम् ।।३८।।

प्रमोदेनाऽथ भूपोऽपि, कुलाचारानुसारतः ।
करोति सकले राज्ये, पुत्रजन्ममहोत्सवम् ।।३९।।

स्वप्ने सिंहावलोकेन, "सिंहसेन" इति शुभम् ।
स्थापितं नाम पितृभ्यां, दिव्यगुणानुसारतः।।४०।।

वर्धते बालसिंहोऽथ, शुक्लपाक्षिक-चन्द्रवत् ।
विनीतः दर्शनीयश्चाऽभ्यन्तर-बाह्यरूपतः ।।४१।।

सिंहो यदाऽष्टवर्षीयो, जज्ञे शिक्षा-कलोचितः ।
कलाचार्यं तदाऽहूय, शिक्षायै स समर्पितः ।।४२।।

"लालयेत् पञ्चवर्षाणि, दशवर्षाणि ताडयेत्" ।
इति सूक्तानुसारेण, शिक्षायै स नियोजितः ।।४३।।

पराक्रमरुचिर्धीरो, निर्भयोऽभयदः परान् ।
शैशवात् सिंहसेनोऽय-मासीनिमृगेन्द्र-बालवत् ।।४४।।

कलाचार्यान्तिके सिंहः, शस्त्र-शास्त्राणि शिक्षते ।
गुरुसेवानुरागेण, "सेवा हि वाञ्छितप्रदा" ।।४५।।

आर्हतं सौगतं चैव, नैयायिकं च कापिलम् ।
वैशेषिकं च चार्वाक-मपाठीद् दर्शनं तु सः ।।४६।।[ षड् दर्शनानि ]

तथा च –

षडङ्गानि चतुर्वेदान्, मीमांसा-तर्कवाङ्मयम् ।
धर्मशास्त्रं पुराणं चाऽधीते विद्याश्चतुर्दश ।।४७।।[ चतुर्दश विद्याः ]

अङ्ग-भौम-स्वर-स्वप्न-व्यञ्जन-लक्षणादिकाम् ।
विद्यां वेत्ति निमित्तोत्थां तथोत्पातान्तरिक्षजाम् ।।४८।। [अष्टौ निमित्तशास्त्राणि]

अधीता संस्कृता भाषा, शौरसेनी च प्राकृता ।
अपभ्रंशा च पैशाची, लोकभाषा च मागधी ।।४९।।[ भाषाविज्ञानम् ]

सन्धिश्च विग्रहो यानं, राज्यस्य हितकारिणः ।
आसनमाश्रयं द्वैधमुपलब्धा गुणाश्च षट् ।।५०।।

सप्ताङ्गमुदितं राज्यं, राजा मन्त्री सुहृत् तथा ।
कोशो राष्ट्रं बलं दुर्गो, विज्ञातं तेन सर्वथा ।।५१।।

अश्वारोह-गजारोह-रथारोहादिका पुनः ।
इति नैकाः कला-विद्याः, क्रीडेव समुपार्जिताः ।।५२।।

अन्यदा कलाचार्येण, नैकयुक्ति-प्रयुक्तिभिः ।
सम्प्राप्त-कौशलो धीरः, सिंहसेनः परीक्षितः ।।५३।।

यत्र नास्ति परीक्षादि, न च पित्रोर्निरीक्षणम् ।
तत्र विद्यार्थिनश्छात्राः, पठन्ति जातु वा न वा ।।५४।।

एतादृशे विवर्ते नु, दुर्लभे नरजन्मनि ।
शैशवं जीवनं द्रव्यं, मन्ये त्रिकं विनश्यति ।।५५।।

अत एव विधातव्यं, विद्यार्थिनां परीक्षणम् ।
सिंहसेनः परीक्षासु, समुत्तीर्णः सुबोधतः ।।५६।।

लब्ध-विद्ये कुमारेऽथ, कलाचार्येण देशितः ।
सपरिच्छद-भूपाल, आगतो हि वनाश्रमे ।।५७।।

विद्यानिपुणः सिंहोऽपि, राज्ञा सहाऽऽययौ गृहम् ।
यथाऽर्थी धनमावर्ज्य, स्वदेशं परदेशतः ।।५८।।

शुभेऽह्नि भूपतिः पौरानामन्त्र्य राजसंसदि ।
राजपुत्रार्जिता विद्या, दर्शयामास त्वद्भुताः ।।५९।।

पूर्ण-चन्द्रोपमं सिहं, कलाभिः देहकान्तिभिः ।
दृष्ट्वा हृष्टाः समे पौराः, प्रशंसन्ति मुहुर्मुहुः ।।६०।।

अन्यदा भूपतिर्दूतं, सुहृदमिव संमतम् ।
प्रेषयामास सिंहाय, स्वान्तर्भावं निवेदितुम् ।।६१।।[ पूर्णोपमालङ्कारः ]

निशम्य राजसन्देशं, याति सिंहः प्रमोदभाक् ।
यथा शिष्यो गुरुं गच्छेदाज्ञापालनहेतुतः ।।६२।।

विनीतः शिष्यवत् सिंह, उपाक्रमत भूपतिम् ।
प्रणम्याऽचीकथत् तात !, कामये वचनामृतम् ।।६३।।[तद्धितवृत्ति-पूर्णोपमालङ्कारः]

उवाच भूपतिः सद्यः, कर्णयोरमृतोपमम् ।
स्वागतं स्वागतं पुत्र !, विष्टर उपविश्यताम् ।।६४।।

वत्स ! वृद्धत्वमापन्न, इच्छामि धर्मसाधनम् ।
यतो "जन्मान्तरे धर्मादन्यः कोऽपि न संबलः" ।।६५।।

धर्मो माता पिता बन्धुः, धर्मः सच्छर्मकारणम् ।
धर्मं विना सुखं क्वाऽपि, न भूतं न भविष्यति ।।६६।।

अस्मिन्नसारसंसारे, दुर्लभं धर्मजीवनम् ।
सेवनीयः सदा धर्मो, यथा कल्पतरुर्भुवि ।।६७।।[ एकलुप्तोपमालङ्कारः ]

रोगशोकजलापूर्णं, दुःखौघ-मकरान्वितम् ।
भवाम्भोधिं परित्यज्य, सद्धर्मं तारकं श्रये ।।६८।।[ रूपकालङ्कारः ]
भीम-कान्त-गुणैः साध्यं, राज्यभारं सुदुर्वहम् ।
योगक्षेमं विधातारं, नाऽन्यं पश्यामि त्वां विना ।।६९।।

तस्मात् पुत्र ! कुलाधार !, राज्यभारं गृहाण भोः! ।
संविधेयं गुरोर्वाक्य-मिति सत्पुत्रलक्षणम् ।।७०।।

पितृवाक्यं निशम्याऽथ, सिंहसेनेन भाषितम् ।
किञ्चिद्भ्रमणकामोऽस्मि, स्वानुभव-विवृद्धये ।।७१।।

ग्रन्थवद् ज्ञानदात्री या, वृद्धवत् स्वानुभावदा ।
आनन्ददा नवोढेव; सा दिग्यात्रा शुभोदया ।।७२।।[ मालोपमालङ्कारः ]

सङ्ग्रामे आयुधा यद्वत्, सचिवो राज्यपालने ।
उपकरोति यात्रायां, निशि दीपो यथा सुहृद् ।।७३।।

अतो हि गन्तुकामोऽस्मि, दिग्यात्रायै ससुहृदम् ।
आगम्य च ततस्तात !, पालयिष्यामि शासनम् ।।७४।।

भवदादेशतो देव !, गम्यते चाऽऽशिषा मया ।
आशीर्वादो हि वृद्धानां, साफल्यहेतुकः स्मृतः ।।७५।।

अथ देवालये देवं, नमस्कृत्य शुभक्षणे ।
फेरुसेनाऽभिधानेन, याति स सुहृदा समम् ।।७६।।

फेरुवत् फेरुसेनोऽयं, विषकुम्भं पयोमुखम् ।
अन्तर्वक्रो बहिः शुभ्रः, कपटेषु हि कर्मठः ।।७७।।

तथाऽपि सिंहसेनाय, रोचते स वयस्यकः ।
भवितव्यानुभावेन, "सङ्गतिर्नैव निष्फला" ।।७८।।

निर्गतौ नगरात् तौ द्वौ, अश्वारूढौ सखड्गकौ ।
ग्रामवनपुरोद्यानं, पश्यन्तौ दूरमाययौ ।।७९।।

कस्मिंश्चिन्नगरं प्राप्तौ, विश्रामार्थं समुत्सुकौ ।
बाह्योद्याने क्षणं स्थित्वा, स उक्तः फेरुणा तदा ।।८०।।

विश्रमार्थं गृहमेकं दृष्ट्वाऽऽगच्छामि यावता ।
तावत् तिष्ठत्विहोद्याने, "वयस्या हितकारिणः" ।।८१।।

भ्रमन् गृहेच्छया सोऽपि, गतो वाराङ्गनागृहम् ।
अलिर्याति यथा पद्मे, यथा वा मक्षिकोत्करम् ।।८२।।

पञ्चषा दिवसान् स्थेयं, भवत्या आलये मुदा ।
अनुजानीहि हे भद्रे !, देयं दास्यामि यद् भवेत् ।।८३।।

वाराङ्गनानुमत्या स, सिंहसेनः समित्रकः ।
देयं दत्त्वा गृहे तस्याः, निवासमकरोत् सुखम् ।।८४।।

वाराङ्गनागृहे तत्र, सप्तसु व्यसनेष्वहो ! ।
निमग्नौ द्वावपि तूर्णं, "सङ्गतिर्नैव निष्फला" ।।८५।।

कालो याति तयोस्तत्र, क्षणवद् घटिकाद्वयम् ।
मुहूर्तवद् दिनं चैव, मासश्च दिनवत् तथा ।।८६।।[ रसनोपमालङ्कारः ]

सा वाराङ्गना कीदृशी आसीत् ?
भृङ्गवृन्दसमाः केशाः, पुष्प-स्तबकवत् स्तनौ ।
हस्तौ किसलयाकारौ, यस्याः सा भाति वल्लीव ।।८७।।

[ उपमेयोपमालङ्कारः ]

एकदा जलक्रीडायां, दीर्घिकायां विलासिनी ।
ऊचे स्वामिन्नहं क्वाऽस्मि ?, सिंहसेनोऽवदत् तदा ।।८८।।

अम्भोजमिव ते वक्त्रं, ते वक्त्रमिव सारसम् ।
तस्मात्कमलिनीखण्डे, त्वां पश्यामि कुतः प्रिये ! ।।८९।।[ साङ्गोपमालङ्कारः ]

इत्यादि विविधां क्रीडां, मनोभावेन कुर्वताम् ।
परस्परनुरागेण, गच्छन् कालो न ज्ञायते ।।९०।।

सिंहसेनोऽथ द्यूतेन, धनमावर्ज्य भूरिशः ।
तुष्टो ददाति वारायै, "गणिका हि धनप्रिया" ।।९१।।

द्यूतकारैः समं सिंहो, रममाणः समित्रकः ।
हारितो बहुशो द्रव्यमधर्मणः बभूव च ।।९२।।

हारितो लब्धुकामेन, द्यूतक्रीडां पुनः पुनः ।
करोति सिंहसेनोऽथ, "विजिगीषा तु दुस्त्यजा" ।।९३।।

तथाऽपि त्यक्तुकामेन, सिंहेनोत्थीयते यदा ।
वञ्चका द्यूतकारास्ते, प्रोचू रन्तुं पुनस्तदा ।।९४।।

उवाच फेरुकः सिंहं, सकृत् क्रीडां विधीयताम् ।
यदि जयस्तदाऽस्माकं, सर्वं द्रव्यं मिलिष्यति ।।९५।।

जानामि सिंह ! सौभाग्यं, त्वत्समं नास्ति कुत्रचित् ।
इति श्रुत्वाऽथ सिंहोऽपि, द्यूते द्रव्यं पणितवान् ।।९६।।

किन्तु दुर्भाग्ययोगेन, तदाऽपि स पराजितः ।
"कुसङ्गो व्यसनं चैव, सर्वापदास्पदं मतं" ।।९७।। [ अनुप्रासालङ्कारः ]

सिंहसेनं समित्रं च, बन्दीकर्तुमथोद्यताः ।
मृगवत् पारधिं प्रेक्ष्य, पलायितौ तदा ततः ।।९८।।

धावन्तौ तौ वनं प्राप्तौ, दृष्टं देवालयं यदा ।
तदोचे सिंहसेनोऽत्र, यापनीया निशात्वियम् ।।९९।।

यस्मात् श्रान्तोऽस्मि हे मित्र !, भयं चाऽत्र न विद्यते ।
तस्माद् देवालये देवं, नत्वा विश्रम्यते मुदा ।।१००।।

इति ध्यात्वा ततस्तत्रोपविष्टौ देवमन्दिरे ।
भयभ्रान्तौ यथा बालौ, स्वगृहे सुखमीयतुः ।।१०१।।[ उपमालङ्कारः ]

तत्रस्थां देवतां दृष्ट्वा, प्रभावाऽतिशयाऽन्विताम् ।
वरदां पद्महस्तां च, दिव्यसौन्दर्यसंभृताम् ।।१०२।।

प्रसन्नः सिंहसेनोऽथ, शब्दालङ्कारया गिरा ।
सद्भावभावसंयुक्तः, स्तौति तां देवतां मुदा ।।१०३।।[ युग्मम् ]

स्तवनानन्तरं सुप्तौ, हर्षखेदसमाकुलौ ।
सिंहः संकेतितो रात्रौ, देव्या सन्तुष्टभावतः ।।१०४।।

स च एवम् -

अथ सुखशय्यायां निद्राणः सिंहो निशीथकाले यद जागरितस्तदा देहचिन्तां निवार्य पवित्रीभूय च देवतासमक्षमुपविवेश, नीरवशान्ते पवित्रे देवालये दिव्यं देवताबिम्बं पश्यन् परमस्वस्थतामनुभवन् स्वकीयमतीतं चिन्तयितुं लग्नः । स्वकीयं नगरं जननी-जनकौ परिजनं च संस्मरन्नाऽयतिं च विभावयन् यावदास्ते, तावद् देवीप्रतिमातः दिव्यतेजःपुञ्जो निर्गतः । वातावरणं च सुगन्धमयं जातम् । मधुरो घण्टारवः श्रुतिपथ- मागात् । नेत्रे उन्मील्य यावत् पश्यति तावत् कुण्डलमुकुटधारिणी दिव्यालङ्कारालङ्कृता साक्षाद् देवता दृष्टिपथमागता । साश्चर्यं नम्रीभूय सिंहोऽवदत् - "हे मातः ! का भवती ? केन हेतुना चेह समागता ?"

देवता उवाच - "हे भद्र सिंहसेन ! अहं युष्मत्कुलदेवता । युष्मत्कुल-संरक्षणं पुरस्करणं च मया विधातव्यम् - इति विचिन्त्येहाऽऽगमनमभवत् । भवता येन हेतुना देशाटनं प्रारब्धं तस्य हेतोः सफलतायै भवता मयोच्यमाना शिक्षाऽनुसर्तव्या ।

योऽयं फेरुसेनः, स दुष्कर्माभिभूतत्वात् त्वां पदे पदे सङ्कट-विधायी भविष्यति । अतस्तस्य संसर्ग मोचनीयः । तथा प्रातर्ब्राह्ममुहूर्ते भवतेत उत्तरदिशि प्रयातव्यम् । तत्र च एको योगी भवते मीलिष्यति" ।

देवीवचनं श्रुत्वा सिंहसेन उवाच - "हे मातः! मित्रं मुक्त्वा कथं व्रजामि ? तथा चाऽन्यत्र गतवन्तमेकाकिनं मां को वा रक्षिष्यति ? यस्मान्नीतिसूत्रे उक्तम् –

एकाकिना बहिर्देशे न गन्तव्यम् कदाचन" ।

देवतोवाच - "हे वत्स ! अद्यप्रभृति यावज्जीवमहं तव सान्निध्यं करिष्ये यदा कदाऽपि सङ्कटः स्यात्, तदा भवताऽहं स्मरणीया । अयं हि फेरुकोऽद्य श्वो वा त्वां सङ्कटे पातयित्वेकाकिनं मुक्त्वा च व्रजिष्यत्येव । अतोऽद्यैव तस्य त्यागो वरम् । अद्यपर्यन्त-मनुभवेन भवता ज्ञातं स्याद् यदयं फेरुको व्यसनी मायावी चाऽस्ति ।

अन्यच्च - रात्रौ विसर्पन् नागो यथाऽवलम्बनीया रज्जुः प्रतीयते, किन्तु प्रातःकाले प्रकाशे ज्ञायते, यदियं न खलु रज्जुः, अपि तु नागस्तदा ततः को नाऽपसर्पेत् ? अयं च फेरुको विषधर इव, अतो न विश्वसनीयः सर्वथा" । इत्येवं सङ्केतं विधाय सा देवता तिरोदधौ ।

ततः सिंहसेनश्चिन्तयितुं लग्नः - "किं कुर्वे ? मित्रं त्यजामि वा न वा ? यतो यं सह नीत्वा निर्गतस्तमर्धमार्गे कथं मुञ्चामि ? इतस्तु देवतायाः सङ्केतोऽप्यनतिक्रमणीयः । अतो देवतासङ्केतानुसारेण सुप्तमेव मित्रं त्यक्त्वा मया गन्तव्यं वरम्" - इति निर्णीय देवतां प्रणम्य ततो देवालयान्निरगच्छत् ।

क्रमश उदीच्यां गच्छन् कियच्चिद्-दिनान्तरे पर्वतोपत्यकायां वननिकुञ्जे सरित्तटे

आश्रममैक्षत । तत्र च अशोकाम्र-वट-निम्बेत्यादिवृक्षैर्घनीभूतं परिसरमवलोक्य मेदुरमनाः सिंहोऽन्तः प्रविश्य यावत् पश्यति स्म, तावत् तत्र नैके मुनिकुमारा दृष्टिपथं आगताः। तत्र केचित् कुमारका जाति-मालती-कुन्द-पद्मादिपुष्पावचयनं कुर्वन्ति स्म, केचित् पुनराश्रमोद्याने जलसिञ्चनं कुर्वन्ति स्म, केचित्तु मार्गपरिमार्जनं विदधति स्म। केचिद् देवमन्दिरे देवार्चनं कुर्वन्ति स्म, केचिद् विद्यागुरुसमीपे विद्यार्जनं कुर्वन्ति स्म, केचिद् यज्ञहेतवे समिधमानयन्ति स्म, केचित् कुलपतिं शुश्रूषन्ति स्म, निर्भीका आश्रम-मृगाश्चाऽत्र तत्र भ्रमन्ति स्म । अत्र सर्वेऽपि निर्भयाः स्वस्थाः सुखिनश्च दरीदृश्यन्ते। सिंहस्त्वाश्रमोद्यानं पश्यन् क्रमशः कुलपति-निवासमगात्। तत्र सविनयं कुलपतिं प्रणम्य समक्षमुपविवेश।

कुलपतिरपरिचितमपि भाविभद्रं सिंहं शुभाशीर्वचनेन सम्भाव्य पृच्छति स्म – "कस्त्वम् ? कुत इहऽऽगतः ? क्व च गम्यते ?" नम्रीभूय सिंह उवाच - "हे परमर्षे ! सिंहसेनाभिधोऽहं राजपुत्रोऽस्मि । अयोध्यानगरीत इहऽऽगतोऽस्मि । विद्या-कला-शिक्षानन्तरं देशाटनं कर्तुं निर्गतोऽस्मि"। कुलपतिः प्राह - "विश्रम्यतां तावदिह कश्चित् कालमित्युक्त्वा तापसकुमार उक्तो यद् - "राजकुमारो विश्रामकुटीरं नेतव्यः" । ततो स्नान-विश्राम-भोजनानन्तरं सायङ्काले कुलपतिसमीपमागत्य प्रणम्य चोपविष्टः । स्वकीयं च मनोभावं निवेदितवान् - "मदीयोऽयं मनोरथो यद् विशालसाम्राज्याधिपतिश्चक्रवर्ती भूपतिर्भवेयम्। ततश्च दिव्यसङ्केतानुसारमिह युष्मच्चरणसरोरुहयोरुपस्थितोऽस्मि। आदिश्यतां तावद् यदितः परं मया विधेयम्"।

सिंहसेनवचनं निशम्य कुलपतिः क्षणं चक्षुर्निमील्य ध्यात्वा चोवाच - "हे भद्र ! भवता कामयमानमिह जगति द्विविधं साम्राज्यं वर्तते - सोपाधिकं निरुपाधिकं च। तत्र सोपाधिकं राज्यं - यद् भवते पितुः सकाशात् लप्स्यते। किन्तु तत्र नैके उपाधयो भविष्यन्ति। तास्त्वेवं - कदाचित् कर्मसहयोगेन पराक्रमेण च वर्धिष्यते, कदाचित् प्रतिकूलपरिस्थितौ हानिं चाऽपि प्राप्स्यते। तथा च मन्त्रि-सेनापति-कोट्टपालादीनामानुकूल्येन स्वस्थतामनुभविष्यसि, तथैव तेषां प्रातिकूल्येन व्याकुलतामपि। अतोऽहं ते तादृशं दिव्यं राज्यं दिदृक्षुरस्मि यदुपलब्ध्यनन्तरं न काचिद्धानिर्न च काऽपि व्याकुलता। अपि तु सदा सर्वदा निराबाधतैव स्यात्। इह चाऽऽश्रमे विद्यमानाः सर्वेऽपि आबाल-वृद्धाः सज्जना इममेव दिव्यं राज्यं लिप्सवो विद्यन्ते। इतः पुरा नैके जना दिव्यराज्यं प्रापुः, सम्प्रति च लब्धुकामाः प्रयतन्ते, भविष्यत्काले च नैके जीवाः प्राप्स्यन्ति। अत्र न कोऽपि सन्देहः"।

इत्येवंविधं कुलपतिवचनं श्रुत्वा सिंहसेनश्चकितः । एतादृशं दिव्यराज्यमभिलषन् स कुलपतिं प्रणम्य वक्ति स्म - "इदं साम्राज्यमुपलब्धुं मया किं कर्तव्यम् ? केन प्रकारेण च स्थातव्यम्?"

कुलपतिरुवाच - "हे भद्र ! इहाऽऽश्रमे इदानीं कतिपया दिवसा निर्गमनीयाः, तथा चेह

वास्तव्यानां मुमुक्षूणां विभिन्ना दिनचर्या शिक्षा चाऽवलोकनीया। यदा भवतो मनोभावोऽनुकूलो भवेत् तदा यद् विधेयं तद् दर्शयिष्यामि । यद्यपीहत्यानां दिनचर्या स्वरूपतः कठोरा स्यात्, दुस्सहा चाऽपि भवेत्, किन्त्वभ्यासेन सरला सुसेव्या च भविष्यति, तदर्थं चाऽयं देवाभिधो मुनिकुमारको भवतः साहाय्यं करिष्यति" ।

सिंहसेनेनोक्तं - "तत्रभवतां भवतां कृपयाऽहं समर्थो भविष्यामि इति मन्ये" ।

ततो विश्रामकुटिरं गत्वा शुभध्यानेन रात्रिं निर्गम्य प्रातःकाले स्नानादिशौचं विधाय देवार्चनं कृत्वा कुलपतिं च नमस्कृत्य सहायक-मुनिकुमारेण सहाऽऽश्रमे सम्भवतः शिक्षाकक्षानवलोकयितुं प्रवृत्तः । देवाभिधो मुनिकुमारकोऽपि विभिन्नशिक्षायाः परिचयं कारयति स्म । एवं दिनत्रयं यावत् तत्राऽऽश्रमे विधीयमानां चर्यां शिक्षाविधिं चाऽवलोक्य चिन्तयति स्म - "एवंविधा दिनचर्या मह्यं रोचते। शिक्षाविधिं विधातुं चाऽहं समर्थो भविष्यामि" - इति विचिन्त्य सहायकं मुनिकुमारकं स्वाभिप्रायं निवेद्य कुलपतिं चोपगम्य सिंहसेनो भणति स्म - "हे भगवन् ! भवतां निर्देशानुसारेण इह आश्रमे स्थित्वा शिक्षां ग्रहीतुमिच्छामि" ।

शुभवेलायां च शिक्षां ग्राहयितुकामेन कुलपतिनोक्तं - "इहाऽऽश्रमेऽनेकविधा विद्याः शिक्षाश्च क्रमेणोपलभ्यन्ते, अतोऽद्य दिनात् षोडशे दिवसे वसन्तपञ्चमीतिथौ भवतः शिक्षारम्भो भविष्यति। अतो भवता स्वनगरं गत्वा पितृभ्यां परिजनाय च सविनयं दिव्यसाम्राज्य-ग्रहणेच्छा निवेद्या, तेषामार्शीवचनमप्यभिलषणीयं कथनीयं च - "भवतां मध्ये यस्य कस्याऽपि तत्र गमनेच्छा स्यात् तेनाऽपि मम सार्धमागन्तव्यम्" इत्यादि ।

सिंहसेनोऽपि स्वनगरं गन्तुमभिलषति स्म। तदा कुलपतिना दिव्याञ्जन-प्रयोगेण तत्क्षणं स स्वनगरपरिसरे अमुच्यत। सिंहसेनोऽपि यावत् चक्षुरुन्मील्य पश्यति स्म तदा कुलपतिर्न दृष्टो न चाऽऽश्रमः, किन्तु स्वनगर-परिसरस्योद्यानं दृष्टम् । स्वप्नवत् किन्तु स्वानुभूतिकं परिवर्तनमवधार्य स राजमन्दिरं गत्वा पित्रोश्चरणयोः प्रणमति स्म।

इतस्तु समित्रसिंहसेनस्य विदेशयात्रागमनानन्तरं कोऽपि विशेषसमाचारस्याऽनवगमात् पित्रोरेतादृशी चिन्ता पुनः पुनरभवद् यद् - "राजकुमारः क्व भविष्यति ? कदा च पुनरागमिष्यति ? " । किन्त्वद्याऽऽकस्मिकं पुत्राऽऽगमनं प्रेक्ष्य हर्षाश्रुपूर्णनेत्रान्वितौ पितरौ प्रसन्नीभूय मस्तकोपरि करं संस्थाप्य शुभाशिषं दत्तवन्तौ ।

तत आसनोपर्युपवेश्य क्षणं वार्तालापं विधाय सिंहसेनाय कथितं ताभ्यां यद् - "विश्रम्य स्नानं च विधाय देवपूजां क्रियताम् । पश्चाद् वयं सहैव भोजनं करिष्यामस्तत्पश्चाच्च परस्परं विशेषवार्ता विधास्यामः । सिंहसेनोऽपि यथासमयं विधेयं विहितवान्, सायङ्काले च सर्वकार्यनिवृत्त्यनन्तरं परस्परं सुखदुःखवार्ता प्रारब्धा तैः। तद्यथा -

"हे मातः ! हे पितः ! भवदाशीर्वादेन देशाटनहेतवे समित्रकोऽहं निर्गतः । मार्गे यद् यदप्यानुकूल्यं प्रातिकूल्यं चोपस्थितं तत् तच्च सर्वमप्यतिक्रम्य यावद् दिव्यसङ्केतेनाऽऽश्रमपदमुपागमम् । तत्र च दिव्यसाम्राज्योपलब्धये कुलपतिना सहयोगः प्रदास्यते । अतो भवतामनुमतिं ग्रहीतुमधुनेहाऽऽगतोऽस्मि ।

पितरावूचतुः - "हे वत्स ! इहैवाऽस्मदीयं विशालं राज्यं वर्तते, तदनुपालय मुधाऽनावश्यकं कष्टं किमर्थं सोढव्यम् ? अत इहैव तिष्ठ, क्वाऽपि मा गाः" ।

सिंहसेन उवाच - "हे पितः ! भवता शोभनमुक्तं, किन्तु यदहं वच्मि तन्निबोधत । इह तावत् साम्राज्यं द्विविधमस्ति, सोपाधिकं निरुपाधिकं च । तत्र भवद्भ्यामुक्तं साम्राज्यं पुण्यानुगामी, सप्रतिद्वन्द्वं सोपाधिकं च वर्तते । अस्य पालने प्रतिक्षणं चिन्ता सङ्क्लेशः कष्टं च स्युः । किन्तु यन्निरुपाधिकं साम्राज्यं तत्र न काऽप्येतादृशी बाधा" । ततश्च कुलपतिना यद् यन्निर्दिष्टं, तत् तत् सर्वं पितृभ्यां निवेदितं, कथितं च - "भवतोरनुमतिमिच्छामि । यया दिव्यं साम्राज्यं प्राप्तुं सफलो भवेयम्" ।

पितृभ्यां अपि नैकप्रकारेण हेतूदाहरणाभ्यां प्रस्तुतराज्यसञ्चालनाय बोधितः सः, तथाऽपि दिव्यसाम्राज्याभिलाषुकः सिंहसेनो वदति स्म यद् - "इदं राज्यमनुजाय देयम्, अहं त्वाश्रमं गत्वा यदुचितं तद् विधास्यामि" ।

सिंहसेनेन पितृभ्यां परिजनैश्चाऽनुमतिरुपलब्धा, इति विशिष्टज्ञानेनाऽवगम्य कुलपतिनैको मुनिकुमारको दिव्याञ्जनेन साकं सिंहसेनानयनाय प्रेषितः । सोऽपि मुनिकुमारकोऽयोध्यां समेत्य राजभवनमुपागम्य शुभाशीर्वचनं दत्त्वा कुलपतिना प्रोक्तमादेशवचनं निवेदितवान् ।

मुनिकुमारवचनं निशम्य राज्ञा परिजनायोक्तं यद् - "अयं सिंहसेनो गृहे न स्थास्यति, भाविभद्रत्वाद्दिव्यं साम्राज्यं लप्स्यत एव, अतोऽस्माभिर्यथायोग्यं सहयोगो दातव्य इत्यहं मन्ये । भवतां योऽप्यभिप्रायः स्यात् स निवेदनीयः" । क्षणं यावत् परस्परं संवादं विधाय सर्वैः स्वनिर्णयो राज्ञे निवेदितो यद् - "भवद्भिरनुमोदितं सिहसेनाभिप्रायं वयमप्यनुमोदयामः" ।

राज्ञा नगरे पटहोद्घोषणं कारितं यद् - "दिनद्वयेनैव राजकुमारः सिंहसेनो दिव्यसाम्राज्योपलब्धये प्रयाणं विधास्यति ततः सर्वैः पौरजनैः समेतव्यम्" ।

पुण्योदये सुखे मग्नैर्गच्छन् कालो न ज्ञायते ।
पितृभ्यां सह सिंहस्य, तद्वद् दिनद्वयं गतम् ।।१०५।।

अथोपस्थिते प्रयाणदिवसे शुभवेलायां मातपित्रादिपरिजनेन पौरजनैश्च परिवृतः सिंहसेनो मङ्गलतूर्यनादेन साकं राजमन्दिराद् निष्क्रमणं व्यधात् । क्रमशो राजमार्गेण व्रजन्

नागरनरनारीभिरभिवन्द्यमानः सिंहसेनो बाह्यमुद्यानं प्राप्तः, पौरजनानभिवाद्य विशेषेण च पित्रादीन् प्रणम्य निमेषमात्रकालेन मुनिकुमारेण सहाऽन्तर्दधौ ।

इतश्च पौरजना मातापित्रादिपरिजनाश्च राजपुत्रविरहदुःखेन विलपितुं लग्नाः चिन्तितं च तैर्यत् - "कुमारो निरुपाधिकसाम्राज्योपलब्धये प्रयातस्तत् तु शोभनं किन्त्वस्माकं तस्य वियोगो दुस्सहः" । इत्येवं वार्तालापं कुर्वन्तः सर्वेऽपि जनाः स्वं स्वं निवासं गतवन्तः ।

इतश्च मुनिकुमारेण सह गगनमार्गेण सिंहसेन आश्रमोद्यानमागमत् । क्रमशश्च कुलपतिचरणयोः प्राप्तः, प्रणम्य च सर्वं वृत्तान्तं निवेदितवान् । कथितवांश्च - "अतः परं मया यद् विधेयं तदादिश्यताम्" ।

कुलपतिरपि प्राह - "हे भद्र ! भवतेप्सितराज्यस्य प्राप्तेर्मार्गोऽतीव विकटोऽतः सावधानीभूय सदा पुरुषार्थो विधेयो यतो मार्गेऽत्राऽनेके उपद्रवा भविष्यन्ति" । सिंहसेनः पृच्छतिस्म - "के के उपद्रवाः ? " कुलपतिरुवाच - "इतः प्राच्यां दिशि प्रयातस्य तव मार्गे गहनं विकटं वनं उपस्थास्यति । तत् तु वनं एतादृक् -

भय-बीभत्स-शृङ्गाररसान्वित-वनवर्णनम् -

स्वस्य गर्जनया विश्वं, विश्वं प्रकम्पयन् क्षणात् ।
उल्लसत्केसरि-सिंह-व्याप्तं वनं भयङ्करम् ।।१०६।।

[ यमकशब्दालङ्कारः ]

वनस्वामित्वभावेन, पुष्पमालामिवेच्छया ।
सटाछटामनोहारि-मृगेन्द्रा विचरन्ति वै ।।१०७।।[ उत्प्रेक्षालङ्कारः ]

मदोन्मत्तः करीवृन्दस्तत्र कृतान्त-दूतवत् ।
क्रीडादुत्पाटयन् वृक्षान्, दृश्यन्ते बालशैलवत् ।।१०८।।

[ उपमालङ्कारः ]

बलवन्तो महाकायाः, कालरात्रीव वर्णतः ।
भ्रमन्ति हस्तिनो येषां, पादाः स्थूलाश्च स्तम्भवत् ।।१०९।।[ उत्प्रेक्षालङ्कारः ]

स्फुरद्-विद्युत्समां जिह्वां, लोलयन्तोऽहयस्तथा ।
कल्पान्त-कालवर्षेव, वर्षयन्तो हलाहलम् ।।११०।।[ उत्प्रेक्षालङ्कारः ]

धगधगायमानानि, ज्वलदङ्गारवत् तथा ।
क्रोधाध्मात-फणीन्द्राणां, नेत्राणि सन्ति सर्वतः ।।१११।।[ उत्प्रेक्षालङ्कारः ]

भूम्याः स्वकीय-रक्षार्थं, भानोः तीव्रकरान् प्रति ।

भूतकेशावलीवैव, वृक्ष-श्रेणिर्विकाशिता ।।११२।।[ उत्प्रेक्षालङ्कारः ]

पृथिव्या वृक्षव्याजेन, लक्षकराः समुच्छ्रिताः ।
विशालाकाशवृक्षस्य, मन्ये पुष्पफलेच्छया ।।११३।।[ उत्प्रेक्षालङ्कारः ]

विकीर्णा रूक्षका दीर्घाऽऽपादान्ता चाऽलकावली ।
कूष्माण्डकस्तनी तत्र, निष्ठुरा श्यामवर्णिका ।।११४।।

हा हा ही ही तथा हू हू, खं खमित्यादि रौरवम् ।
रक्तपिपासिका क्रूरा, शब्दं करोति डाकिनी ।।११५।।[ युग्मम् ]

गलितकुपणैर्व्याप्ते, शोणित-मांससंभृते ।
नेकपूतिपदार्थैश्च, दुर्गन्धप्रचुरेऽवटे ।।११६।।

पुनः कर्दमके तत्र, पातालं यावदाश्रिते ।
कीटाकुले निमज्जन्ति, भ्रमन्तोऽनेकप्राणिनः ।।११७।। [ युग्मम् ]

वज्रतुण्डोग्रदशना, लक्षसङ्ख्याः पिपीलिकाः ।
चालनीवद् दृढं भूमेश्छेदनाय समुद्यताः ।।११८।।

आवनं व्याप्तमश्वेतं, विचित्रं प्राणरुन्धकम् ।
क्वचित् स्थानेऽस्ति दावाग्निः, कुर्वन् ग्रीष्मेऽपि वार्दलम् ।।११९।।

दावानलोच्छलज्ज्वालाः, पचन्तीव नभश्चरान् ।
तथा मेरुप्रदक्षिणां, कुर्वतश्च ग्रहगणान् ।।१२०।।[ उत्प्रेक्षालङ्कारः ]

वनस्थ-प्राणिनां प्राणान्, हन्तुकाम इवाऽनिशम् ।
तीक्ष्ण-कुन्ताग्रवत्तत्र, जीमूतो वर्षति क्वचित् ।।१२१।।[ उत्प्रेक्षालङ्कार ]

घनाघनानां सङ्घोषः, विशालाकाश-मण्डपे ।
सुरासुराणां सङ्घर्ष, इव संश्रूयते सदा ।।१२२।।

भीषणरणसङ्ग्रामे, वीरहस्तगतासिवत् ।
विद्युच्चकास्ति तत्राऽपि, चित्रा तथा च रौद्रका ।।१२३।।

समरे खड्ग-सङ्घर्षौ, पतदग्निकणा इव ।
गगनान्निपतदुल्का, भयं कुर्वन्ति सर्वदा ।।१२४।।[ उपमालङ्कारः ]

स्थिता अजगरा दीर्घा, वृक्षेषु गिरिमस्तके ।
मुखमुद्घाट्य सर्वत्र, गिरीणां कन्दरा यथा ।।१२५।।

[ उत्प्रेक्षालङ्कारः ]

कानन-प्राणिनः, सर्वान् मन्ये ताडयितुं सदा ।
कृतान्त-सैनिका व्याघ्रा, भ्रमन्ति कश-संयुताः ।।१२६।।[ उत्प्रेक्षालङ्कारः ]

तीक्ष्णदन्तावली मन्ये, तुण्डे किल कीलावली ।
व्याघ्राणां च नखश्रेणिर्दात्राणामावली यथा ।।१२७।।[ उत्प्रेक्षालङ्कारः ]

भ्रमन्ति शब्दान् कुर्वाणाः, शृगालास्तन्महावने ।
क्षुद्रजन्तून् हि शाठ्येन, पीडयन्ति निरन्तरम् ।।१२८।।

पुनश्च तन्महारण्ये, वातोऽपि गदकारकः ।
यत्र तत्र च सर्वत्र, विषवल्ल्यादिसंयुते ।।१२९।।

विद्यते शैलमालाऽपि, महारण्यस्य मध्यमे ।
अभ्रँल्लिहा तथा दीर्घा, दुःखारूढा च दुर्गमा ।।१३०।।

तस्यां पर्वतमालायां, वर्तन्ते गिरिकन्दराः ।
श्यामा भयावहा गूढा, नरककुम्भिका इव ।।१३१।।[ उपमालङ्कार ]

वसत्येको महारक्षस्तत्र द्रुमाकुले गिरौ ।
रौद्राकारं प्रचण्डं यत्, पापात्मा दुःखदायकम् ।।१३२।।

कानन-स्थितजीवानां, क्रूरतां स पराजयन् ।
महामायी महाक्रोधी, वञ्चकः प्राणघातकः ।।१३३।।

नैकाकी किन्तु दैत्येन्द्रः, परिवृतोऽस्ति सेवकैः ।
लुण्ठकैश्छलिभिर्घोरैराज्ञापालन-तत्परैः ।।१३४।।

रतिदाऽरतिदानाम्न्यौ, दैत्यस्य कन्यके उभे ।
जन्मत एव ते मन्ये, किम्पाक-फलसदृशे ।।१३५।।

बाह्यतस्त उभे कन्ये, रूपलावण्यसङ्गते ।
गौरवर्णे मनोज्ञाङ्गे, गजकुम्भपयोधरे ।।१३६।।

एकैकस्या मुखाब्जं तु, पूर्णराकेन्दु-सदृशम् ।
श्यामा स्निग्धा सुदीर्घा च, केशाली सर्पसदृशी ।।१३७।।

हस्तपादं तथोष्ठौ च, राजन्ते रक्तवर्णतः ।
पाटलिताङ्गमप्यस्या, लसत्पद्मवनोपमम् ।।१३८।।

स्तनभारतया तन्वीकटिकयाऽभिरामिका ।
एकैका पुष्ट-सज्जङ्घा, स्मरस्य शिक्षिकेव हि ।।१३९।।

वाराङ्गनेव निर्लज्जे, स्वकामार्थ-परायणे ।
जन्मतो विषकन्ये ये, परप्राणविनाशिके ॥१४०॥

वनप्रविष्टसार्थस्य, जनानां क्षोभदायिके ।
आश्लेषाच्चुम्बनात् ते हि, विषसङ्क्रमकारिके ॥१४१॥

विषावेगेन सङ्क्षुब्धा, मूर्च्छिता वा मृता जनाः ।
रुधिरं पिबतस्तेषां, तथा मांसं च खादतः ॥१४२॥

इत्यादय एते एतादृशाश्चाऽन्येऽपि सामान्याः प्रबलाश्च उपद्रवा भवेयुस्तथैव क्षुत्पिपासादीनि कष्टान्यपि स्युः । अत्र स्युरेवेति तु न किन्तु सम्भावना वर्ततेऽतः शिक्ष्यमाणाः सकला विद्या आदरणीया याश्च विपत्काले प्रयोगेण निरुपद्रवो भविष्यसि ।

प्रान्ते च य एकः करालो महादैत्यः समेष्यति । तत्र भवता निपुणेन भाव्यम् । यस्तं जयति स साम्राज्याधिपतिर्भवति, यश्च तेन पराजीयते, स पुनः पुनर्वनसंबन्धिनीमापदां लभते । तस्मादयं महादैत्यः सर्वप्रयत्नेन निपात्य एव, यतो एते सर्वे उपद्रवास्तस्य प्रभावेण पुनः पुनः सञ्जायन्ते । अतो निश्चीयते यत् सर्वदुःखानां मूलकारणं अयं महादैत्य एव" ।

इत्यादिप्रकारेण सैद्धान्तिकं सद्बोधं निरूप्य, आश्रमोद्याने सकलपरिवारयुतेन कुलपतिना सिंहसेनाय यथाविधि मन्त्रशिक्षा रक्षाकवचश्च प्रदत्ते स्म । सोऽपि च सिंहसेनः प्रमुदितमनास्तत् सर्वं स्वीकृत्य यथाकालं यथोचितमनुष्ठेयमनुष्ठानं विदधाति स्म, स्वात्मसामर्थ्यं च प्रकटनाय भृशं यतते स्म । यदा च परिपक्वतां लभते स्म तदा कुलपतिस्तमाहूय भणति स्म - "हे भद्र ! एतावता कालेन भवान् सामर्थ्यसम्पन्न इति वयं जानीमहे, अत इदानीं तव हितायाऽयमादेशः, यद् भवता विद्याशिक्षाभिः सहितेनैकाकिनैव दिव्यसाम्राज्योपलब्धये प्रयातव्यं, मार्गे देहावष्टम्भनायोपयोगिनामुपकरणानां हेतवे इमा अष्टौ विद्या अपि भवते दास्यन्ते । त्वया सादरमादेयाः प्रयोज्याश्च । तत्प्रदानार्थं च वसन्तपञ्चमीदिवसश्चितोऽस्ति, स चेतः पञ्चमो दिवसो वर्तते, तावद् भवता तद्धेतुकः पूर्वाभ्यासो विधेयः, आत्मविश्वासश्च प्रबलीकार्यः" ।

सिंहसेनो भणति स्म - 'तथेति' । ततः कुलपतिं प्रणम्य विश्रामकुटीरं गतः, आत्मन्यात्मनाऽऽत्मानमनुप्रेक्षते स्म, स्वसामर्थ्यं चाऽवलोकयति स्म दृढयति स्म च ।

अथ वसन्तपञ्चमीदिवसे ब्राह्ममुहूर्ते मङ्गलपाठक उवाच यथा - "अधुना यथा वृक्षा जीर्णपर्णानि परित्यज्य स्वं नूतनैः पर्णैरलङ्कुर्वन्ति तथा स्वजन्म सफलीकर्तुकामैराश्रमनिवासिकुमारकैर्विशेषकलाकौशल्यं पुरुषार्थश्च समादरणीयौ" । सिंहसेनोऽपि स्वयं जागरूक आसीत्, तथाऽपि मङ्गलपाठकवचनेन विशेषेणोत्साहितोऽभवत् ।

सहस्रकिरण उदयाचलं यावदारोहति तावत् प्रयातुं सज्जः सिंहः कुलपतिमुपेत्य प्रणम्य

च रथारूढोऽभवत् । आश्रमवासिमुनिकुमारकैः सह कुलपतिरपि मङ्गलपाठं बभाण । सर्वैरपि जय-जयारवध्वनिरुद्घोषितः । इत्येवंप्रकारेषु शुभशकुनेषु प्रवर्तमानेषु सिंहसेनेन प्रयाणं विहितम् ।

## शौर्यरसः

बभ्राजे सिंहसेनोऽथ, शस्त्रविद्यासमन्वितः ।
मन्ये विपक्षसङ्ग्रामे, पराक्रमो हि मूर्तिमान् ।।१४३।।[ उत्प्रेक्षालङ्कारः ]

अक्रूरः शौर्यसद्भावे, चञ्चलो न गतिक्रमे ।
तेजस्वी न च सन्तापी, चतुरोऽपि न लम्पटः ।।१४४।।[ विरोधालङ्कारः ]

निर्भीकोऽपि क्षमाशीलो, गम्भीरो न च गुह्यभाक् ।
आर्जवत्वेऽपि न मूढोऽयमीदृक् सिंहः प्रयाति सः ।।१४५।।[ विरोधालङ्कारः ]

गच्छन् क्रमेण सम्प्राप्तो, घनाटवीं सुदुर्गमाम् ।
दुर्गमां वन्यजन्तूनां, मानवानां तु का कथा ? ।।१४६।।

तत्राऽस्ति वन्यवृक्षाणां, पर्णानां च प्रगाढता ।
जायते यामिनी-भ्रान्ति-र्मध्याह्नेऽपि यया सदा ।।१४७।।

तथाऽपि धैर्यभाक् सिंहो, याति योधो युधि यथा ।
शृणोति तत्र ब्रह्माण्डं, स्फोटयत् सिंहगर्जनम् ।।१४८।।

[ अनुप्रासः पूर्णोपमालङ्कारश्च ]

यावत् समीक्षते तावत्, पुरो मार्गे मृगाधिपः ।
करालः सपरिच्छदः, सम्प्राप्त उच्छलन् क्रुधा ।।१४९।।

चिन्तयन्निति रोषेण, कोपाऽऽविष्टो हरिर्भृशम् ।
रौद्रत्वं धारयन् चित्त, आक्रामति सिंहं प्रति ।।१५०।।

वने समस्ति स्वामित्वं, कोऽपि नोल्लङ्घते वचः ।
किन्तु कृतान्तसादृश्ये, मत्समीपे समेति कः? ।।१५१।।[ युग्मम् ]

स्मृतं तु सिंहसेनेन, ह्याग्नेयास्त्रं स्वरक्षकम् ।
तत्क्षणं हि ज्वलज्ज्वाला, रथं परित आवृता ।।१५२।।

विलोक्याग्निं महाज्वालं, भीतः क्षुब्धश्च केसरी ।
तथाऽपि सिंहघाताय, ह्याक्रामति पुनः पुनः ।।१५३।।

चतुरः सिंहसेनोऽपि, स्पृशति कार्मुकं तदा ।

वर्षयति वार-वारं, वारः वारं यथा घनः ।।१५४।।[ उत्प्रेक्षायुक्तयमकालङ्कारः ]

तदा सिंहाग्रणीः सिंहः, विद्धः पञ्चत्वमाप्तवान् ।
पलायिता वने केचिद्, व्रणीभूतास्तथा परे ।।१५५।।

सिंहापन्मुक्तसिंहोऽथ, ह्यन्यत्रं संवृणोति तु ।
गच्छति पुरतः सिंहः, "साहसिनः कुतो भयम्?" ।।१५६।।

कार्यारम्भे तु साफल्यं, परमः शकुनो मतः ।
वर्धितोत्साहः सिंहोऽपि, चेतसि नन्दति तदा ।।१५७।।

समाश्वासयितुं सिंहं, मन्दवाता ववुस्तदा ।
लता सृजति पुष्पाणि, मार्गे स्वागत-हेतवे ।।१५८।।

विरौति मधुरं व्रातो, विहगानां समन्ततः ।
गुञ्जन्ति मधुपा मन्ये, कुर्वन्ति सिंहकीर्तनम् ।।१५९।।[ उत्प्रेक्षालङ्कारः ]

सम्पश्यन् वनसमृद्धिं, साफल्यं च स्वकर्मणः ।
प्रयातः सिंहसेनोऽग्रे साक्षादिव पराक्रमः ।।१६०।।[ उत्प्रेक्षालङ्कारः ]

इतश्च वन्हस्तिनां, व्रातः प्रकम्पयन् धराम् ।
प्रचण्डध्वनिभिर्वन्यान्, त्रासयन् भापयँस्तथा ।।१६१।।

शुण्डादण्डैर्महावृक्षानुत्थाप्योत्क्षेपयन् भुवि ।
रोषाध्माता महाकायाः, समायान्ति स्म ते गजाः ।।१६२।।

अकाण्ड एव हस्तिनां, दर्शनात् क्षुभ्यति क्षणम् ।
किन्तु शौर्यदृढावेगात्, करोति सिंहगर्जनाम् ।।१६३।।

दिशां भरैर्वचोनादं, जायमानं पुनः पुनः ।
करिणः भीषणं श्रुत्वा, सद्य जाताः हतप्रभाः ।।१६४।।

तदा मतङ्गजाः सर्वे, दिक्षु दिक्षु पलायिताः ।
यथाऽऽरक्षकनादेन, चौरा नश्यन्ति तत्क्षणम् ।।१६५।।

[ उपमालङ्कारः ]

सिंहसेश्चिन्तयति स्म - "भाग्ययोगतोऽयमप्युपद्रवो विनष्टः । अतः परमन्येऽपि न जाने कत्युपद्रवाः स्युः ? अतो मयाऽतीव सावधानेन भवितव्यं कुलपतिना प्रदत्ता शिक्षा च सम्यगवधारणीया प्रयोक्तव्या च, यया निरुपद्रवीभूय क्रमेणेष्टं दिव्यसाम्राज्यं लभेय" ।

इत्येवं चिन्तयन् क्रमेण व्रजन् सायङ्काले विस्तीर्णसरःसमीपमुपागतः । तत्र क्षणं विश्रम्य

परितः सरः समवलोक्य, शीतलं स्वच्छं सलिलं चुलुकेनाऽऽचम्य तत्रस्थान् विहगान् वृक्षांश्च पश्यति। मन्दमन्दं प्रवातेन वायुना तस्य श्रमो दूरीभूतः। सरस्तीरे विशालवटवृक्षस्याऽधस्तात् स्वकीयं रथं संस्थाप्य रात्रिनिर्गमनाय सुरक्षितं स्थानमेतदिति मत्वा तत्रैव सुष्वाप, इष्टदेवं च संस्मरन् निद्राधीनः सञ्जातः।

व्यततीते प्रथमे यामे, नागवृन्दं समागतम्।
कुर्वन् प्रचण्डफूत्कारान् वंशपुञ्जेऽनिलो यथा ॥१६६॥[ उत्प्रेक्षालङ्कारः ]

निर्जनोपवने शान्ते, प्रवाति मातरिश्वनि।
अकस्मात् फणिफूत्कारान्, श्रुत्वा सिंहस्त्वजागरीत् ॥१६७॥

स ददर्श च रत्नानि, रक्तवर्णानि सर्वतः।
चरता चिन्त्यते तेन, किमेतद् दृश्यते मया ॥१६८॥

सिंहसेनः विचिन्त्येति, सावधानं प्रपश्यति।
विषज्वालां विकिरन्तः, सरीसृपाः समागताः ॥१६९॥

ते तु विषधरा दीर्घाः, श्यामवर्णा भयङ्कराः।
फुफुत्कारान् प्रकुर्वन्ति, स्निग्धत्वग्धारिणो मुहुः ॥१७०॥

स्मृता मायूरिका विद्या, सिंहेनाऽविलम्बतः।
मयूरास्तत्क्षणं नैके, प्रादुर्भूताः समन्ततः ॥१७१॥

शिखिनां शब्दतः सर्वे, सर्पा जाता भयान्विताः।
पलायितास्ततस्तेऽपि, यथाऽरुणोदयात्तमः ॥१७२॥

इत्येवंप्रकारेण मुक्तोपद्रवः सिंहसेनः क्षणं विश्रान्तिमिच्छन् स्वपिति स्म, निद्रायां च स्वप्नमैक्षिष्ट यथा, कोऽपि दिव्यपुरुषः श्लोककद्वयं भणित्वाऽन्तर्हितः। तद् यथा...

व्रज झटिति भवगदशमनम्।
        व्रज झटिति भववनदहनम्।
व्रज झटिति शमदमशरणम्।
        व्रज झटिति शिवसुखसदनम् ॥१७३॥

यदर्थं यासि हे भद्र !, मार्गः स शोभनो खलु।
उपसर्गास्तु तत्राऽपि, धैर्यं धारय सर्वदा ॥१७४॥

तत उत्थितः सन् स्वप्नस्वरूपं पुनः पुनः संस्मरन्नर्थानुसंधानं च चिन्तयन् इष्टदेवं स्मरति स्म। तदनु सरसि स्नानं विधाय उदयाचलस्थं सूर्यं प्रणमति स्माऽर्घ्यं च ढौकते स्म।

लब्ध्वा देवसुसान्निध्यं, प्रस्फोर्य स्फारपौरुषम् ।
देवं गुरुं च संस्मर्य, प्रयाति लक्ष्यसिद्धये ।।१७५।।

व्रजन् पुरत ऐक्षिष्ट, घना घटा तरूद्भवा ।
यतः पदमपि तस्यामग्रे गन्तुं न शक्यते ।।१७६।।

दुर्गमामटवीं प्राप्य, रथः प्रयाति नो पदम् ।
सस्मार परशोर्विद्यां, सिंहः समुचितां तदा ।।१७७।।

नैके परशवस्तत्र, तीक्ष्णाः प्रकटितास्तदा ।
वनद्रून् खण्डशः कर्तुं, प्रवृत्ताश्चक्रिचक्रवत् ।।१७८।।[ उपमालङ्कारः ]

परशुविद्यया तत्र, विघ्नाः क्षणाद् विनाशिताः ।
प्रयाणं कुरुते सिंहः, स्वेष्टसिद्धि-सुसिद्धये ।।१७९।।

श्रेयसि शतशो विघ्नाः, सम्भवन्ति समन्ततः ।
किन्तु धीरा विवेकेन, लङ्घयन्ति प्रयत्नतः ।।१८०।।

सिंहोऽपि धैर्यवान् धीरः, स्वात्मवीर्य-पराक्रमी ।
यस्माद् बिभेति नो क्वाऽपि, सिंहवन्निर्भयः सदा ।।१८१।।

अथ स्वकीयपरमसुखलब्धुकामोऽविनाशि-सम्पूर्ण-स्वाधीन-स्वसाम्राज्यं काम्यन्, अखण्डप्रयाणैः क्रमशो निशामुखे एकं विशालं वटवृक्षं समाश्रितः । तत्राऽश्वान् विश्रामयितुं रथान्निर्बद्धान् कृतवान्, तद्योग्यमाहारं जलं चोपलाभितवान्, स्वयं च विश्रमितुं वृक्षाधः-स्थितामेकां शिलापट्टिकामाश्रित्य सुष्वाप । यद्यप्यद्याऽपि तस्य निद्रा नाऽऽगता किन्तु विश्रामाय नेत्रे निमील्य विश्राम्यति स्म । घटिकाद्वयानन्तरमकस्माद् रौद्रारावः प्रादुर्बभूव । श्रवणपथागतं विकटं ध्वनिमाकर्ण्य चक्षुषी उन्मील्य पश्यति स्म किन्तु तत्र न कोऽपि दृग्गोचरोऽभूत् । तथा हा...हा...ही...ही... इत्यादिका विविधा विरूपाश्च ध्वनयः समन्ततो वर्धितुं लग्नाः । सिंहः क्षणं विमृश्य सावधानीभूतः, किमपि विरूपं भविष्यतीति संभाव्य च तत्प्रतीकाराय सज्जीभूतः । अत्रान्तरे कश्चिद् अस्थिपञ्जरस्तत्पुरतः समापतत् । सिंहो यावत् परामृशति स्म – कस्यैतदस्थिपञ्जरः, कुतो वाऽऽगतः ? केन वा किमर्थं प्रक्षिप्तः ?, तावत् भीषणाकृतिः सपरिकरा डाकिन्येका प्रादुर्भूता । चित्र-विचित्रशब्दैराकारैश्च भापयितुं लग्ना । किन्तु निर्भयमचलं स्थिरं गम्भीरं सिंहं निरीक्ष्य साऽऽनुकूल्यं यथा स्यात् तथा वदति स्म यद् - "हे सिंह ! निर्भयत्वेन प्रसन्नाऽस्मि, अतस्ते सान्निध्यमभिलषामि । अहं सदैव तव साहाय्यं करिष्यामि । त्वं मा विमुच्य क्वाऽपि मा गाः" - इत्यादीनि तस्या वचनानि श्रुत्वा भावज्ञः सिंहो वक्ति - "हे भद्रे ! मैवं विधेहि, अहं ते साहाय्यं नेच्छामि, भवती स्वस्थाने एव तिष्ठतु" ।

सिंहवचनं श्रुत्वा कुपिता सा सिंहमुपद्रोतुं विभिन्नानि शस्त्रास्त्राण्यतिबीभत्सं भयानकं

रूपं च निर्मितवती स्म । निर्भयः सिंहोऽप्यविलम्बेन "परबलस्तम्भिनीं" विद्यां स्मृतवान् । विद्याप्रभावेण सद्यो गृहीतनैकशस्त्रास्त्रा सा गगनाङ्गणे एव चित्रलिखितेव स्थिरीभूता परितापं च प्राप्ता । तां दीनां भीतां विवर्णां चाऽवलोक्य संजातकरुणः सिंहस्तस्यै शिक्षात्मकानि वचनानि भणित्वा विद्यां च संहृत्य विसृष्टवान्, सा च डाकिनी भयभ्रान्तेव ततः पलायिता ।

ततोऽग्रे निरुपद्रवं वर्त्म पश्यन् पुरतो जिगमिषुः सिंह इष्टदेवं स्मृत्वा प्रयाणमकरोत् । आश्रमतः प्रयाणकाले कुलगुरुणा प्रदत्ताभिः पञ्चभिर्विद्याभिरिष्टमाहारं, जलं, वस्त्रं, शयना-दिकं च सर्वमुपकरणं च समुपलभ्य सुखं सुखेन याति ।

मार्गावलोकनं कुर्वन्, स सिंहः स्यन्दन-संस्थितः ।
पश्यति तरु-पुष्पाणि, फलानि श्वापदांस्तथा ।।१८२।।

प्रसन्नवदनो सिंहः, स्वसाफल्यसमीक्षकः ।
अकस्मात् प्रेक्षते मन्दं, गच्छति स्यन्दनं किमु ? ।।१८३।।

संलोकनेन जानाति, मार्गोऽयं कर्दमाकुलः ।
पुरतो विस्तृतं चैव, कर्दमं पूतिगन्धकम् ।।१८४।।

यत्र तत्र च सर्वत्र, मार्गो जम्बाल-संभृतः ।
व्रजिष्यामि कथं न्वग्रे, गन्तव्यं निश्चितं खलु ।।१८५।।

हे देव ! हे गुरो ! देहि, सामञ्जस्यं मतौ मम ।
भवत्प्रसादतो नूनं, सङ्कटोऽयं विनङ्क्ष्यति ।।१८६।।

तदा स्मृता क्षणं ध्यात्वोहापोहौ प्रकुर्वतः ।
गुरुदत्ता वरा विद्या, हयातापिनीति सञ्ज्ञिका ।।१८७।।

विद्यास्मरणमात्रेण, प्रादुर्भूता शरावली ।
समन्ततस्तापः, सूर्यकोटिसमोऽभवत् ।।१८८।।

यथा भ्राष्ट्रसमायोगात्, शुष्यन्ति जलबिन्दवः ।
तथैवाऽऽतापिनीयोगात्, पङ्कः शोषमुपागतः ।।१८९।।

विलोक्याऽनुमतं, मार्गं रथं वेगादचालयत् ।
सुखेन क्रमशो गच्छन्, पश्यति काञ्चिच्चित्रताम् ।।१९०।।

रथस्य परितो घोराः, सर्वत्र वज्रतुण्डिकाः ।
पिपीलिका विवर्तन्ते, दुर्वाराः क्षुद्रजन्तुभिः ।।१९१।।

हयान् दशन्ति वैरूपं, हेषन्ते व्याकुला हयाः ।
तनोति कार्पूरीं विद्यां, ता निवारयितुं तदा ।।१९२।।

*क्षोभकारी व्यथाकारी, ह्युपद्रव-परम्परा ।*
इत्येवं मन्यमानेन, सिंहेन गम्यतेऽग्रतः ।।१९४।।

चिन्तयति च -
अद्य यावद् नु ये केऽपि, संजाताः क्षुद्रसंभवाः ।
परीषहाः समे तेऽपि, दुष्टाः प्राणोपघातकाः ।।१९५।।

तद्यथा -
पञ्चाननो गजेन्द्रश्च, नागो घनाटवी तथा ।
डाकिनी कर्दमः षष्ठः, पिपीलिका च सप्तमः ।।१९६।।

अतः परं येऽपि समेष्यन्ति तान् सर्वानपि निश्चितं जेष्यामि एव ।

ग्रीष्मकाले वैशाखे मासे सहस्रांशुमालिनि सन्तपति सति श्वापदेषु गिरिनिकुञ्जान्त-र्निलीनेषु सत्सु, पर्वताग्रस्य तृणेषु ज्वलत्सु सत्सु, अग्रतः प्रयाणं कुर्वन् सिंहः किञ्चिद् दूरं ययौ यावत्, तावत् तस्य श्वासोच्छ्वासग्रहणे पीडा जाता । प्राणाश्च रुद्धा इव, नेत्रयोर्ज्वलनं समुत्पन्नमश्रूणि च निरगलन् । यदा दूरे पश्यति स्म तदा धूम्राणां घनघटाभिर्वियतः परितः मलिनीभूतं दृष्टम् । क्षणाच्चाऽद्राक्षीदग्नेर्ज्वालाः प्रचण्डपवनारूढा इव सम्मुखमायान्ति । शुष्कैः वृक्षैः सह हरितानपि वृक्षान् दहन्नयमग्निः करालकालवत् प्रतिभाति स्म ।

अटव्यां परितो वन्यप्राणिनमार्तनादः श्रुतिपथमागच्छति स्म । उपद्रवोऽयं केन प्रकारेण निवारणीयः ? - इति चिन्तयन् तेन वारुणीविद्या स्मृता, अविलम्बेन प्रयुक्ता च । एतावता या पुरा धूमघटाऽऽसीत्, सा वारुणी-विद्या-प्रभावेण मेघघटा बभूव । तत्कालमेव मेघगर्जनाभिः सह तडिल्लतया च साकं मुशलधारा वर्षा प्रावर्षत्, वर्षया चाऽऽविर्भूतेन जलप्रलयेनाऽग्निज्वालाः शमिता घर्मो दूरीभूतः शीतलश्च वायुर्मन्दमन्दं प्रवाति स्म ।

उपद्रवः शान्तो जात इति मत्वा स्वस्थीभूतः सिंहः कृतज्ञभावेन देवं गुरुं च स्मरति स्माऽग्रेतनं मार्गं च प्रेक्षते स्म ।

अष्टविधविद्याभिः स्वदेहोपयोगीन्याहारादीन्युपलभमानः सिंहः शनैः शनैः प्रयाणं विदधन् कियद्भिः पक्षैर्बहुतरं भूमिभागं व्यतीयाय । तत इष्टार्थसिद्धिसम्पादनं सफलतां च समवगच्छन् प्रमोद-मेदुरमना विराजते स्म ।

कालेन व्यतीतो ग्रीष्मः, समागता वर्षा । जलभृद्-वारिदानां घनघटा तथा भाति स्म यथा धनुर्धरो राक्षसः । शरासारवद् जलधारा तथा वर्षितुं लग्ना यथा सिंहस्त्रासं लभते स्म । तदा मेघगर्जनेन सहाऽलातमिव तडिदपि विजृम्भते स्म । सर्वतो वर्षज्जलपूरैः कूलिनीनां कूलानि तथा विदद्रिरे यथा सिंहस्य हृदयम् । यथा च जडानां संसर्गेण सज्जनानामपि विवेको मन्दो भवति

तथा जलपूरेण सिंहोऽपि किंकर्तव्यमूढोऽभवत् ।

अत्राऽन्तरे साहसिकः सिंहस्तत्क्षणमनिलास्त्रविद्यां प्रयुज्य प्रचण्डमनिलं विरचयति स्म यया सर्वेऽपि वारिदाः क्षणभङ्गुरा इव शीर्णा विशीर्णाश्च जाताः । किन्तु तदैव गगनतला दग्निगोलकवज्ज्वलन्त्यो नैका उल्काः पतितुं लग्नाः । तदा सिंहेन तत्कालमेकं विशालं छत्र विनिर्मितं यदुल्काऽग्निप्रतिकारायाऽलं भवेद् रथश्च वेगेन तथा प्रेरितो यथा क्षणात् सोपद्रववर्त भूमिरतिक्रान्ता ।

इत्येवंप्रकारेण संभविन उपद्रवान् विद्या मन्त्र-बल-प्रयोगेण निवारयन् सिंहोऽग्रत प्रयाति स्म, तदाऽध्वन्यन्येऽपि क्षुद्रोपद्रवाः प्रादुर्भवन्ति स्म । ते त्वेवम् - अजगरा व्याघ्राः शृगालाः, रोगकारकवायुः, विषम-पर्वतमाला, गिरिकन्दराः, इत्यादौ विषमाकुलताप्रसङ्गेऽपि सिंहवद् निर्भयः सिंह एकस्य विशालपर्वतस्योपत्यकायां आगतवान् । कतिपयान् दिवसान् यावद विश्राम्यति स्म, तावदेकदा रात्रौ चतुर्थे यामे सा कुलदेवता स्वप्ने आगता, या पूर्वमपि सहयोगिन्यभवत् । कथितं च - "हे सिंह ! अतः परमल्पाः सूक्ष्मा किन्तु रौद्रपरिणामा विरूपाः कतिपये उपद्रवा भविष्यन्ति, तान् विजित्येष्टमर्थं त्वं लप्स्यसे" ।

स्वप्नं वीक्ष्य महाभागो, जागर्ति सिंहसेनकः ।
ब्राह्ममुहूर्तसमये, संस्मरन्निष्टदेवताम् ।।१९७।।

देवतास्मरणात् प्रातः, पवित्रं जायते मनः ।
मनोवीर्य-प्रभावेण, भयं न क्वाऽपि जायते ।।१९८।।

सुखासनोपविष्टेन, श्रुतः पदरवो मृदु ।
परितः पश्यति यावद्, दृष्टं कन्याद्वयं तदा ।।१९९।।

आवृतं वल्लिपत्राद्यैर्लतापुष्पविभूषिताम् ।
सम्प्रेक्ष्योत्प्रेक्षते सिंह, एतत् सत्यं किमु भ्रमः ।।२००।।

उपसिंहं समेते ते, जङ्गमे कल्पवल्लिके ।
उवाच प्रथमा तत्र, वाचा सुधामधुरया ।।२०१।।

"अहं चाऽरतिदा ज्ञेया, ह्यत्र वने निवासिनी ।
रतिदा भगिनी नाम्ना, ज्येष्ठा मम रतिप्रदा ।।२०२।।

इहत्यजन्तुजातानां, रतिः पात्रानुसारतः ।
अरतिश्च प्रदीयेते, क्रमशो भाग्ययोगतः ।।२०३।।

तातोऽस्ति मोहभूपालो, योग-क्षेमङ्करः सदा ।
इहत्य-वनवासिनां, जन्तूनां सर्वयत्नतः ।।२०४।।

शासनं कुरुतेऽखण्डं, वनेऽत्र चिरकालतः ।
तथाऽपि धर्म-भूपालो, जीवान् मोचयते बलात् ।।२०५।।

अतोऽस्माकं महाशत्रुर्ज्ञातव्यो धर्मभूपतिः ।
भवता तस्य छायातः, स्थेयं सदैव दूरतः ।।२०६।।

आवां द्वौ भवतां सेवां, कर्तुकामे सदा मुदा ।
किन्तु तातस्य निर्देशः, सेवनीयः प्रयत्नतः ।।२०७।।

यावत् तातप्रसत्तिः स्यात्, तावदावामनुकूले ।
इति प्राथमिकी वार्ता, धार्या हृदि विशेषतः ।।२०८।।

आगम्यतां प्रासादे, अलङ्क्रियतां वासगृहम्, अनुभूयतामस्मत्सेवाम् । मनोरञ्जनायेह नैके नर्मभाषिणो जनाः सन्ति । देहश्रम-विनोदाय नैके देहमर्दनकारिणः सेवका विद्यन्ते । ज्ञातिपरिजनाश्च भवतः सदैव साहाय्यं करिष्यन्ति" ।

इत्यादिकां कथावार्तां, श्रुत्वा सिंहः परामृशत् ।
सद्यः स्मरति प्रज्ञप्तिं, हेयोपादय-दर्शिकाम् ।।२०९।।

प्रज्ञप्ति-विद्यया प्रोक्तं, शृणु भद्र ! यथोचितं ।
इमे द्वे कन्यके शुभ्रे, किन्तु विभ्रमदायिके ।।२१०।।

आपातरम्यतां भातः, किंपालफलपाकवत् ।
अन्ततो विरसे त्वेते, मा गास्तद्वशतां ततः ।।२११।।

प्रज्ञप्ति-विद्यया प्रोक्तं, वृत्तं निशम्य वीरसूः ।
चिन्तयति चं किं कार्यं, विधेयं ? हितकृत् किमु ? ।।२१२।।

क्षणं सक्तो विरक्तश्च, सिंहो विकल्पनाकुलः ।
हेया किमु समादेया ?, एते विषमदारुणे ? ।।२१३।।

सुबुद्धि-प्रेरितः सिंहो, लक्ष्यसिद्ध्यै समुत्सुकः ।
कुबुद्धिप्रेरणाच्चाऽयं, क्षणं विश्रान्तिमिच्छति ।।२१४।।

तदा समागता विद्या, प्रेरयामास तं दृढम् ।
नाऽत्र स्थेयं त्वयेत्युक्त्वा, गता तत्क्षणमेव सा ।।२१५।।

सिंहसेनस्तु प्रज्ञप्ति-विद्यादेव्याः सुसूचनात् ।
तत्क्षणं धैर्य-धौरेयो, विवेकधारकोऽभवत् ।।२१६।।

मृदुगम्भीरया वाचा सिंहो वक्ति स्म - "भो भद्रे ! विशिष्टकार्याय निर्गतोऽहमत्र स्थातुं न

शक्नोमि। अतो मामग्रतो गन्तुमनुमन्येयातां क्षम्येतां च यदहं भवत्सेवां नाऽङ्गीकरोमि। दर्शयेतां च मह्यमग्रेतमः पन्थाः, यथाऽहं स्वकीयं कार्यं शीघ्रं साधयामि"।

सिंहोक्तं वचनं श्रुत्वा निराशाऽरतिरन्तारुष्टा सत्युवाच - "हे सिंह! यदि त्वमस्मद्वचनं न मन्यसे तदाऽऽवां त्वां प्रतिकूले भविष्यावः। अस्मत्तातश्च ते नैकविधानि प्राणान्तानि कष्टानि दास्यति। अतो अद्याऽप्यस्मद्वचनमनुमन्यस्व, चिरकालं च सुखेन तिष्ठ"।

दिव्यदृष्टिभृन्निर्भयः सिंहोऽनाकुलभावेन भणति स्म - "भो भद्रे! नाऽहं बिभेमि भवतीभ्यां भवत्तातादपि च"। इत्युक्त्वा सिंहस्ततोऽग्रेतनमार्गे वेगेन प्रयाति स्म।

अत्राऽवसरे रुष्टे रतिदा अरतिदा च कन्यके तत्कालं स्वतातसमीपं गते। सिंहेन विहितां स्वनिर्भत्सनां निवेद्य कथितं यद् - "उत्थीयतां निर्वाप्यतां च सिंहसेनो वनान्निर्गच्छन्"। दुहितृवचनम् आकर्ण्य रोषाध्मातः स राक्षसस्तत्क्षणमुत्थायाऽस्त्रशस्त्रान्वितां स्वसेनां चाऽऽदाय सिंहं प्रति दधावे।

सुभटानामनेकानां, स्वामी पल्लिपतिस्तदा।
सिंहस्य वर्त्मनि सद्य, आपपात समन्ततः ॥२१७॥

सेनावृतमरिं प्रेक्ष्यं, सिंहः सिंहपराक्रमी।
तत्क्षणं वीर्यसंभारं, स्फोरयन् वीर-राजभूः ॥२१८॥

या सर्वास्त्रमहाज्वाला, सर्वोपद्रवशामिका।
गुरुदत्ता महाविद्या, तां प्रयुङ्क्ते तदा स्वयम् ॥२१९॥

महाविद्या-प्रभावेण, सेनासंयुतराक्षसः।
तथा त्रस्तो महावैरी, सिंहं दृष्ट्वा यथा मृगः ॥२२०॥

संप्रेक्ष्य वर्त्म निर्विघ्नं, सिंहो व्रजति वाजिवत्।
यत्राऽस्ति दिव्यसाम्राज्यं, तत्राऽऽरोहति पर्वतम् ॥२२१॥

अयं शैलो महादुर्गः, श्रेणिवानपि दुर्गमः।
शक्यते येन केनाऽपि, तत्र गन्तुं न सर्वथा ॥२२२॥

किन्तु धीरो महावीरो, विद्यते यो महाबली।
अत्यन्तैकान्त-वीर्येण, तत्र प्रवेष्टुमर्हति ॥२२३॥

यत्र गतेन वीरेण, स्थेयं तत्रैव सर्वदा।
न चाऽस्ति वैर-विद्वेषस्तत्र स्थितिमतां कदा ॥२२४॥

एतादृशं शुभं स्थानमपारसुखसम्भृतम् ।
क्षणेन दिव्यसाम्राज्यं, सिंहसेन उपागमत् ।।२२५।।

पुराऽप्यत्र सुसाम्राज्ये, आयाताः सन्ति सज्जनाः ।
स्नेहान्विता गुणैः पूर्णाः, परेषामृद्धिकाङ्क्षिणः ।।२२६।।

इहत्याः सर्वभूपालास्त्यक्तवैरानुबन्धकाः ।
सन्तुष्टाः परसमृद्धौ, परोन्नतिसमुत्सुकाः ।।२२७।।

एतेषां पदवी ज्ञेया, निश्चला निरुपद्रवा ।
प्रारम्भो विद्यते किन्तु, विरामो न कदाचन ।।२२८।।

सिंहसेनोऽपि तत्रैव, स्वसामर्थ्यविशेषतः ।
संजातः स महाभूपः स्वस्य साम्राज्यभूमिषु ।।२२९।।

कथेयं कल्पिताऽस्माभिर्मोक्षपुमर्थहेतवे ।
उपनयोऽपि विज्ञेयः, कथ्यमानो यथातथम् ।।२३०।।

★★★

| | | |
|---|---|---|
| दिव्यसाम्राज्यम् | - | मोक्षपदम् |
| सिंहसेनः | - | मोक्षाभिलाषिजीवः |
| फेरुसेनः | - | कुसंगतिः |
| कुलदेवता | - | सद्बुद्धिः |
| कुलपतिः | - | दीक्षाप्रदातृगुरुः |
| मुनिकुमाराः | - | अन्ये गुरुबान्धवाः |
| मुनिकुमारकाणां परिचर्या | - | यतिदिनचर्या |
| काननम् | - | संसारः |
| उपद्रवाः | - | मोक्षपथि विघ्नभूताः क्रोधादि-शत्रवः |
| शस्त्रास्त्रविद्याः | - | क्रोधादीनां प्रतीकाराय समतादयः |
| राक्षसः | - | मोहनीयं कर्म |
| अष्टमहाविद्या | - | अष्टप्रवचनमातरः |
| सर्वास्त्रमहाज्वालाविद्या | - | क्षपकश्रेणी |

★★★

**कथा**

# संस्कारप्रपा

- मुनिः अक्षयरत्नविजयः

## (१) कदाऽपि चिन्तितं मरणम् ?

चिन्तकाः कथयन्ति यदस्माभिः स्वजीवने द्वे स्मरणे नित्यं कर्तव्ये - १. उपकारस्मरणं, २. मरणस्य स्मरणम् । उपकारस्य स्मरणेन मानवः प्रगतिवान् भवति, इतो मरणस्य स्मरणेन मानवः पापकार्येभ्यो विरमति । अस्याऽनुसन्धाने प्रस्तूयते कथेयं विदेशीया -

अल्फ्रेडनामकः कश्चित् स्फोटकाग्निचूर्णस्य संशोधकः । एकदा प्रभाते वर्तमानपत्रं गृहीतं तेन । वर्तमानपत्रे प्रमुखसन्देशं पठित्वा नितरां विस्मितवान् सः । यतः प्रमुखसन्देश एतादृश आसीद् यद् 'अल्फ्रेडनोबलस्य मरणम्' ।

अल्फ्रेडश्चिन्तितवान् – 'अहं तु स्वस्थः सन् जीवामि । ततः केन मम मृत्युसन्देशः प्रसारितः?' इति ।

तदनु कौतुकेन स्वमृत्यसन्देशं पठितुमारब्धः सः । सन्देशं पठित्वा तद्हृदयं दुःखाऽनुभूतिं कृतवत् । सन्देशेऽलिख्यत यद् 'स्फोटकाग्निचूर्णसंशोधकस्य मृत्युसर्जकस्य वैज्ञानिक-अल्फ्रेडस्य मरणम् । '

सन्देशं पठित्वा प्रहृत इव स्तब्धः सञ्जात अल्फ्रेडः - 'अहो ! किमिदं महादुःखदम्? मम जीवनविरामपश्चाज्जनाः 'मृत्युसर्जको वैज्ञानिकः स' इति स्मरिष्यन्ति माम् । जगतः सुखार्थं किञ्चिदपि शुभं न कृतं मया, अत एव फलमिदं हीनं लप्स्यते । किञ्च, मया तु स्फोटकाग्निचूर्णस्य संशोधनं कृत्वा जगतो दुःखार्थमेव कार्यं कृतम् । किन्तु, अतः परं शोभनानि सुखप्रदानि सत्कार्याणि कर्तव्यानि मया । येन जगन्मां स्मरेत् सुविधम् ।'

ततः परमल्फ्रेडनोबलेन बहूनि सुखप्रदानि शान्तिप्रदानि शुभकार्याणि जगते कृतानि । विश्वशान्त्यर्थं यैर्मानवैः सत्कार्याणि कृतानि, तेभ्यो मानवेभ्यः पारितोषिकान्यपि प्रदत्तानि तेन । तस्य स्मृत्यर्थमद्याऽपि 'नोबल'पारितोषिकाणि प्रदीयन्ते ।

मृत्युस्मरणेन 'अल्फ्रेडनोबल'सदृशो विदेशीयो जनोऽपि सज्जनः सञ्जातः । किम्? अस्माभिः कदाऽपि चिन्तितं मरणं येनाऽस्मज्जीवनमपि भवेच्छुभं सर्वोत्तमञ्च ?

*****

## (२) ईश्वरः

परमात्मनः परमकृपाशीलस्य कृपावृष्टिर्भवति सर्वत्र सर्वजनेषु च, एतस्मिन् प्रश्नः कोऽपि न। अपि तु प्रश्नोऽयं यदस्माकं पार्श्वे ग्रहीतुं तां श्रद्धाभाजनं विद्यते न वा? यदि श्रद्धाशीला भविष्यामो वयं परमेश्वरं प्रति तर्हि विकटदशायामपि सत्पथः सुविधं प्राप्यतेऽस्माभिः ।

केभ्यश्चिद् वर्षेभ्यः प्राग् भारतीयसैनिकाः केचित् पर्वतीयदुर्गमस्थाने कस्मिंश्चित् सैन्यप्रशिक्षणार्थं गच्छन्ति स्म । कठिनमार्गमध्ये क्षुधार्त्ताः सञ्जातास्ते । तत्पश्चात् स्तोकसमयान्तरे तैः क्षुधापीडितैर्मार्गस्था काचित् पान्थशाला दृष्टा । यद्यपि पान्थशालायां खाद्यपदार्था विद्यन्ते स्म, किन्तु पान्थशालास्वामी न विद्यते स्म तत्र । अतः सैन्यप्रशिक्षकाज्ञया सैनिकैः स्वयमेव खाद्यपदार्था भुक्ताः सन्तोषश्चाऽनुभूतः । पान्थशालायां १००० रूप्यकाणि मुक्त्वा प्रशिक्षकः ससैनिको निर्गतः ।

कानिचिद् दिनानि व्यतीतानि । सैन्यप्रशिक्षणं समाप्य सर्वे सैनिकाः पुनस्तां पान्थशालां प्राप्ताः । पान्थशालास्वामी तदा तत्रैवाऽऽसीत् । सर्वैः सैनिकैस्तत्र विश्रामः कृतः, भोजनं चाऽपि कृतम् । तत्राऽन्तरे स वृद्धपान्थशालास्वामी मुहर्मुहुर्वदति स्म – 'हे ईश्वर ! परमकरुणासिन्धो ! तव कृपयेव भवति सर्वं साधु । किञ्चिदपि शुभं भवेत् तत् सर्वं भवेत् तव कारुण्येनैवेति ।'

सर्वैः सैनिकैरपि श्रुतमिदं नैकशः । ते सर्व आसन्नितरां नास्तिकमतानुगाः । अतो पान्थशालाया निर्गमनवेलायां सत्यामन्यतमः सैनिक उक्तवान् वृद्धं प्रति – "मान्य ! ईश्वरेणैव सर्वं साधु क्रियत इति तव भ्रम एव । तत्त्वत ईश्वरेण न, अपि त्वस्मत्पुरुषार्थेनैव सर्वं भवति समीचीनम् । ईश्वरस्तु न विद्यतेऽस्मिन् जगति ।"

वृद्धोऽवदत् - "सज्जन ! प्रथमं मम वार्तां शृणु । तदनु त्वमेव कथयिष्यसि यद् ईश्वरो नूनं विद्यते विश्वेऽस्मिन् । त्रिभ्यो मासेभ्यः प्राग् मम पुत्रो महाव्याधिग्रस्तः सञ्जातः । तस्य चिकित्सार्थं रूप्यकाण्यपि नाऽऽसन् मम पार्श्वे । तदा चिन्तातुरोऽहं पान्थशालामागतः । अहं नितरां मूढ आसम् । तदा मया दृष्टं यन्मम काष्ठफलकस्योपरि १०००रूप्यकाणि सन्तीति । अहमतिहृष्टोऽभवम् । रूप्यकैस्तैर्मया पुत्रस्य चिकित्सा कृता । मम पुत्रोऽधुना समीचीन-स्वास्थ्योऽस्ति । मित्र ! अहं नूनं मन्ये यत्तस्मिन् दिन ईश्वर एव मम सहायकोऽभवत् । अन्यथा महाशय ! त्वमेव चिन्तय, अस्मिन् वनसदृशनिर्जनप्रदेशे तस्मिन्नेव दिने कः सहायको भवे-न्मम? अत एव कथयामि नित्यमीश्वरं प्रति यत्तव परमकृपयैव भवति साधु सर्वमिति ।"

तस्य सैनिकस्य स्मृतिपथि तद्दिनमवतीर्णं यदा सैन्यप्रशिक्षणाय सर्वे सैनिका अनेनैव मार्गेण गच्छन्ति स्म । सर्वे चाऽतिक्षुधातुरा आसन् । तदा पान्थशालेयं दृष्टा तैः, पान्थशालायाञ्च भोजनमपि कृतं सन्तोषप्रदम् । वनप्रदेशेऽत्र तस्मिन् दिने दुष्प्रापं भोजनं कथं प्राप्तं तैः? कदाचिद् वृद्धस्येवेश्वरस्तेषां सहायकोऽप्यभवत्तस्मिन्नह्नीति चिन्त्यते स्म तेन ।

## (३) सहिष्णुता

मानवजीवनमिदं महामूल्यं परमपदप्राप्त्यर्थं प्राप्तमस्माभिः । अतो जीवनमिदं वैशिष्ट्यपूर्णं पारलौकिकसाधनार्थं व्यतीतव्यं नूनम् । यद्यपि श्रामण्यं गृहीत्वैव साधनेयं श्रेष्ठतयैव क्रियेताऽस्माभिः । परन्तु गार्हस्थ्येऽपि विविधसद्गुणप्राप्तिरूपेण साधनेयं क्रियते नूनम् । साधनापथे सर्वप्रथमा वर्तते सहिष्णुतासाधना । गृहस्थजीवनेऽपि साधनेयं कीदृशी महती वर्तते तद्दर्शकोऽयं प्रसङ्गोऽद्भुतः –

ईश्वरचन्द्रविद्यासागरवर्यस्य शैशवं तत् । 'भगवतीदेवी' इत्याख्या तस्य माताऽऽसीदतिकरुणाशीला । दुःखिनां सेवैव तज्जीवनम् । अन्येषां लघु वा बृहद् वा दुःखमपि विलोक्य तदपाकर्तुमवश्यं प्रयतते स्म सा । अत एव निःशेषग्राममध्ये 'परमकरुणामयी' इति विश्रुताऽऽसीद् भगवतीदेवी ।

किन्तु कैश्चिद्दग्धजनैर्भगवतीदेव्याः प्रसरती कीर्तिरियं न सोढा । इतस्ते यशो-रोधनेऽक्षमा अप्यासन् । अतस्तैर्भगवतीदेव्या गृहद्वारि नित्यं निशायामवस्करं क्षिप्यते स्म । तस्या गृहाङ्गणं नित्यं तैर्दुष्टैर्दूषितं भवति स्म । तथाऽपि भगवतीदेव्याः स्व-दुःखनिवेदनं कदाऽपि न कृतम् । सा प्रत्यहं सस्मितं गृहप्राङ्गणं समीचीनं करोति स्म ।

परमनेन तु दुष्टानां साहसमवर्धत । अथ तु मृतमूषकादयोऽपि भगवतीदेव्या गृहद्वारि क्षिप्यन्ते स्म तैः । अतो बाल ईश्वरचन्द्रोऽतिक्रुद्धतयोक्तवान् - "अम्ब ! किंपर्यन्तमेषां दुष्टानां क्लेशाः सहनीयाः? अथ तूत्तरं नूनं देयम् ।"

"वत्स ! सहिष्णुता किंपर्यन्तं रक्षणीयेति प्रश्नो न " – भगवतीदेव्या अद्भुतमुत्तरं प्रदत्तं - "यतो विरोधिनामन्तःकरणेऽस्मान् प्रति द्वेषो वर्तते । यावत् स द्वेषः स्नेहरूपो न भवेत्तावद् धैर्यं रक्षितव्यम् । सहिष्णुतामाध्यमेनैव फलं शोभनं प्राप्स्यते ।"

तत्त्वत एवमेवाऽभवत् । विरोधिनामन्तःकरणं नितरां परिवर्तनं प्राप्तम् । द्वेषं परित्यज्य नितान्तं स्नेहिन आदरवन्तोऽपि सञ्जातास्ते ।

*अत्राऽवधेयम्, यो सहनं करोति स एव महत्तां प्राप्नोति ।*

*****

# भिक्षुः अखण्डानन्दः

- मुनि-राजयशविजयः

बोरसदग्रामे लल्लुभाई-लुहाणानामा एको युवा वसति स्म । आ बाल्यकालाद् एव पुस्तकपठनेऽतीव प्रीतिस्तस्य । आध्यात्मिकसंस्कारोपेतपुस्तकपठनप्रेम्णा तन्मनो वैराग्य-वासितमभवत् ।

द्वादशवर्षवयसि तस्य पिता निधनं गतः । ततस्तस्य वैराग्यमितोऽपि दृढीभूतम् । मनश्च संसाराद् विमुखीभूतम् ।

एकस्मिन् दिने गृह-परिवारस्वजनान् परित्यज्य साभ्रमतीनदी तीरे स 'भिक्षुः अखण्डानन्दः' - इति नाम्ना संन्यासं गृहीत्वा भिक्षुशिवानन्दस्य शिष्यत्वमङ्गीकृतमनेन ।

पश्चात् हिमालये गङ्गोत्रीं गत्वा विद्याभ्यासे प्रवृत्तः ।

एकदा मुम्बईनगरी समागतः सः । तत्रैकस्मात् पुस्तकविक्रेतुः सकाशाद् **भजनसङ्ग्रहः** इत्याख्यं पुस्तकं क्रेतुं गतः स, किन्तु तन्मूल्यं ज्ञात्वा व्याकुलो जातः । विचारितश्च तेन यज्जनाः पुस्तकं न पठन्तीत्यत्राऽधिकमूल्यमेव कारणम् । "ननु सत्साहित्यमल्पमूल्येन प्रकाशितुं न शक्यते किम्?" भिक्षोः मनसि सुरम्यविचाराङ्कुरः पुस्फोट ।

कदाचित् प्राणिनां स्वविचारस्य संयोजनायाऽवसरोऽपि सपद्येव प्राप्यते । तथैव तदैव भिक्षुरखण्डानन्दः पूर्वपरिचितस्यैकस्य सज्जनस्य पत्रमवाप्नोत् । लिखितश्च तत्र - "कस्यचित् स्वजनस्याऽऽत्मश्रेयसे त्रिंशद्रूप्यकाणि व्ययनीयानि, तदर्थं च भागवतग्रन्थस्यैकादशमध्यायं मुद्रयित्वा तद्वितरणेच्छा वर्तते" ।

यच्चिन्तितं तदेव समागतमिति भिक्षुवर्यः प्रमुदितः । मुम्बई-नगर्यामेवैकस्मिन् गृहाङ्गणे काष्ठपेटिकां स्थापयित्वोपविष्टः सः । तत्र स्वपरिश्रमेणैव प्रतिलिपि-शोध्यपत्रादिकं स्वयं कर्तुं लग्नः ।

तदानीं सम्पूर्णमुद्रणप्रक्रियाऽतिनिकटतया तेन दृष्टा । मुद्रणस्य मूल्यं, कर्गदमूल्यं, पुस्तकबन्धनकार्यं, प्रेषणव्ययः - इत्यादिनैकवस्तूनां सूक्ष्मतया परिचयः कृतस्तेन । प्रौढीभूत-श्च सोऽस्मिन् विषये ।पश्चात्तु पुस्तकमल्पमूल्यं कथं भवेदेति प्रयत्नं कृत्वैकानन्तरमेकमिति बहूनि पुस्तकानि प्रकाशितानि ।

एवंप्रकारेण तेन **'सस्तु-साहित्यवर्धक कार्यालय'** - इत्यभिधा पुस्तकप्रकाशनसंस्था

स्थापिता। कालानन्तरं काष्टपेटिकास्थाने पटलासन्दिके समागते।

ततः परं कार्यालयं मुम्बईतः अहमदावादमध्ये समानीतम्। तत्राऽपि प्रकाशनकार्यं तु वर्धमानमेवाऽऽसीत्।

अथ संस्थायाः स्वामित्वाधिकारः समितिं विरचय्य प्रदत्तस्तस्यै तथापि सञ्चालनं तु अखण्डानन्दस्वामिहस्तेनैव प्रवर्तमानमासीत्।

एकदा तन्मनसि विचारः समागतो यद् - "मम विलयानन्तरं कार्यमिदं रुद्धं भविष्यति।" अतः संस्थायाः सर्वोऽपि प्रकाशितः सङ्ग्रहोऽर्धमूल्येनैव विक्रयणार्थ- मुद्घोषितः। "सस्तु-साहित्कार्यलयोऽथ विसर्जनं प्राप्नोति" - इति श्रुत्वा पठनानुरागिणो जनाः पुस्तकक्रयणार्थं सत्वरं समागताः पुस्तकानि च स्वल्पकालेनैव विक्रीतानि। तद्विक्रयणेन सुमहद्धनं सम्प्राप्तम्। तेन च समृद्धाऽभवत् संस्था। ततश्च कार्यालयविसर्जनविचारं त्यक्त्वा तस्य पञ्जीकरणं कृतम्।

भिक्षु-अखण्डानन्दस्तु वैक्रमे १९४२तमे वर्षे दिवङ्गतः। परं सपादवर्षशतानन्तरमपि सस्तु-साहित्यवर्धककार्यालयतः पुस्तकानि प्रकाश्यन्ते। इदानीन्तु **अखण्ड-आनन्दः** इति नाम्ना सामयिकस्य प्रकाशनमपि प्रचलति भिक्षुवर्यस्य स्मृतौ।

सुसंस्कारोपेतमल्पमूल्यं साहित्यं जनसामान्यस्य कृते प्रकाशनीयमित्येषाऽस्ति महती सेवा समाजस्य। नूनं भिक्षु-अखण्डानन्दवर्योऽस्मदादर्शतया भावयितव्यः।

******

# भक्तिभावः श्रेष्ठः

- सा.ध्यानरसाश्रीः

अथाऽन्यदा भगवान् श्रीकृष्णः केनचित् कार्येण हस्तिनापुरमागत आसीत्। कार्यसमाप्त्यनन्तरं स बुभुक्षितः सन् विदुरस्य गृहं गतः। तदा विदुरपत्नी पारसंवी गृहे एकाकिन्येवाऽऽसीत्। श्रीकृष्णं गृहमागतं वीक्ष्य साऽत्यन्तं हृष्टा सती धावन्ती बहिरागता श्रीकृष्णं च सत्कृत्य गृहान्तर्नीतवती। भक्तितत्परां तां वीक्ष्य श्रीकृष्णेनोक्त - "भोः! पारसंवि ! अहं भृशं बुभुक्षितोऽस्मि, अतश्च तव गेहे भोजनार्थमागतोऽस्मि"।

पारसंवी दुःखिता सती कथितवती - "प्रभो ! अद्यैकादश्यस्ति, अतोऽद्य मे गृहे न किमपि पक्वमन्नमस्ति। वयं तु केवलं फलाहारं करिष्यामः। परन्तु भवान् काञ्चिद् वेलामुपविशतु, अहं सद्य एव किञ्चन पचामि"।

श्रीकृष्णः स्मेरमुखः सन् कथितवान् - "अरे ! नास्ति तावत् पक्वान्नस्याऽऽवश्यकता मम, अहमपि फलान्येव खादिष्यामि। आनयतु तावत्"।

एतन्निशम्य मुदिता पारसंवी झटिति कदलीफलान्यानीतवती। ततो भगवतः सम्मुखमुपविश्य भक्तिरसनिमग्ना सा सर्वमपि विस्मृत्य कदलीफलानां त्वचमपनीय फलगर्भमधः क्षिपती त्वचमेव भगवते खादितुं दत्तवती। श्रीकृष्णोऽपि तस्या भक्त्या प्रमुदितः सन् किञ्चिदप्यविचार्य कदलीत्वचमेव सास्वादं खादितवान्।

एतावता विदुरः समागतः, पारसंव्या दीयमानां कदलीफलत्वचं खादन्तं च श्रीकृष्णं विलोक्य कुपितः सन् पारसंवीमुपालब्धवान् - "रे मूढे ! किमेतत् करोति भवती? कदलीगर्भमधः क्षिप्त्वा त्वचमेव खादितुं ददाति भगवते !"। विदुरवचः श्रुत्वा सा भावलोकाद् बहिरागता सती दृष्टवती यत्तया कदलीत्वगेव श्रीकृष्णाय खादितुमर्पिताऽऽसीत्। सा लज्जिता सत्येकं शब्दमपि वक्तुमक्षमा जाता।

तदा विदुरेणोक्तं - "प्रभो ! मम पत्नी त्विहलोकं विस्मृत्य भक्तिलीना सती भवते कदलीत्वचं दत्तवती, परं भवता तु सा निषेद्धव्याऽऽसीन्ननु !"।

श्रीकृष्णेन सस्मितमुक्तं - "भो विदुर ! यथा पारसंवी मद्भक्तिलीना सती सर्वमपि विस्मृतवती तथैवाऽहमपि तस्या भक्तिभावं दृष्ट्वा सर्वमपि विस्मृत्य तया दीयमानां

कदलीत्वचं खादितुं तत्परोऽभवम्। अहं सदाऽपि भक्तिमेव श्रेष्ठां मन्ये न पुनः पदार्थान्। भक्तहृदये स्थितान् भावान् सर्वथाऽमूल्यानवगच्छाम्यहं तैरेव च प्रेरितोऽहं प्रवृत्तो भवामि"।

एतच्छ्रुत्वा विदुर-पारसंव्यौ द्वे अपि सर्वथा प्रमुदिते जाते भगवत आशिषं च गृहीतवत्यौ। श्रीकृष्णोऽपि प्रसन्नमनसा स्वस्थानं गतवान्।

*******

# रामो यं त्यजेत् तं को वा रक्षेत् ?

- सा. हंसलेखाश्रीः

यदा राम-लक्ष्मणौ वानराधिपतिः सुग्रीवश्च सीतामुक्त्यर्थं ससैन्यं लङ्कां प्रति प्रस्थितवन्तस्तदातनीयं घटना।

लङ्कागमनाय समुद्रोल्लङ्घनमनिवार्यमासीत्। तदर्थं च रामस्याऽऽदेशेन कपिसेनया मङ्क्षु सागरे सेतुबन्धनमारब्धम्। सहस्रशो वानराः कार्यान्विता जाताः। तर्हि बृहत्यः शिला उत्पाट्योत्पाट्य वारिधौ प्रक्षेप्तुमारब्धाः। प्रक्षिप्तासु च तासु सतीषु नैकाऽपि शिला नैव निमज्जति स्माऽपि तु सर्वा अपि तरन्ति स्म। एवं च सेतुनिर्माणकार्यं सर्वथा सम्यक्तया प्रचलदासीत्।

अथ समस्तं कार्यं निरीक्षमाणेन रामेणैकदा विमृष्टम् - "इमे वानराः सेतु-निर्माणकार्ये भृशं प्रयतन्ते खलु, तर्हि कथं नाम मयाऽलसतयोपविश्येत ? अतोऽहमपि शिला आनीयाऽऽनीय वारिधौ प्रक्षिपेयं तेषां च सहायको भवेयम्"।

ततो रामेणैका शिलाऽऽनीता जलधौ च प्रक्षिप्ता। निमेषमात्रेण सा शिला जले निमग्ना। रामो विस्मयचकितोऽभवत् क्रुद्धोऽपि च। स अन्या अपि द्वित्राः शिला आनीय जले प्रक्षिप्तवान्, परं तासामपि सैव गतिः।

अथ च समीप एवोपविष्टो हनुमान् सर्वमिदं नटकमेलकं विलोकयन्नासीत्। अट्टहासं विदधानः सोऽवदत् - "प्रभो ! भवतो नाम्नः प्रभावेण शिला एतास्तरन्ति, किन्तु भवानेव यां मुञ्चेत् तां को वा तारयेत् ? "

एतच्छ्रुत्वा रामस्य मुखं स्मितस्मेरं सञ्जातम्। स कपिसेनायाः भक्तिं समर्पणं च हृदयेनाऽनुमोदितवान्।

******

# दृष्टिः

- सा.तत्त्वनन्दिताश्रीः

एकदा कस्यचन तडागस्य तीरे सिंहो जलं पातुं समागतः । तस्मिंश्च जलं पिबति व्याघ्रोऽपि कश्चन तत्र जलं पातुमागतः । जलं च पिबन्तौ तौ मिथः संलापं कुरुतः स्म । व्याघ्रः प्राह – "इदानीमत्यन्तं शीतकालोऽस्ति । माघमासोऽस्ति वर्तमानः, सन्ध्याकालश्च सन्निहितः, दिनकरस्त्विदमिदानीमेवाऽस्तमयं प्रस्थितोऽस्ति" ।

वनराजोऽकथयत् - "भोः! शीतं तु पौषमास्येवाऽधिकं भवति न पुनर्माघमासे । अतः नेदानीमत्यन्तं शीतकालोऽस्ति" । तच्छ्रुत्वा व्याघ्रोऽवदत् - "किं वदति भवान् ? शीतं तु माघमास्येवाऽधिकं भवति न पुनः फाल्गुनमासे" ।

एतावता पुरस्तात् कश्चन शृगाल आगच्छन् दृष्टः । तं दृष्ट्वा सिंहोऽवदत् - "चलतु भोः! अयं खलु चतुरः शृगालः समागतोऽतस्तमेव विषयमेतं पृच्छावः । स एवाऽऽवयोः समाधानं दास्यति" ।

व्याघ्रेणोक्तं - शृगालः ? कुत्राऽस्ति शृगालः ?

सिंहोऽवदत् - एष वृतिमुल्लङ्घ्य समागच्छति भोः! । इदानीं पश्य, मार्गे तत्र लुकलुकायमानः आगच्छन्नस्ति ।

आम् सत्यम् । चलतु भवान्, तमेव पृच्छामः ।

शृगालस्तूभावपि दृष्टवानासीत् पूर्वमेव । तथाऽपि मनसि भयभीतोऽपि स स्वस्थतां नाटयन् तयोरुभयोः समीपमागतः । तं दृष्ट्वैव व्याघ्रोऽवदत् - "भोः ! आवयोर्मध्ये एका समस्योत्थिताऽस्ति । कृपया भवांस्तस्याः समाधानं करोतु" ।

शृगालोऽवदत् - "वदतां भवतोः समस्यां कृपया, अहं तत्समाधानं कर्तुं प्रयतिष्ये" ।

तदा सिंहोऽवदत् - "तर्हि कथयतु यत् शीतं माघमासेऽधिकं भवत्युत पौषमासे ? "

शृगालश्चिन्तितवान् - "यद्येकोऽप्यनयोः कुपितो भविष्यति तदा मम त्वत्रैव वर्षशतं पूर्णं भविष्यति । अतः कमप्युपायं चिन्तयामि" । ततः क्षणं विचिन्त्य तेनोक्तं - "भवन्तौ द्वावपि मम ज्येष्ठौ पूज्यौ च स्तः । अतः भवतोऽपि न्यायं कुर्वाणोऽहं को वा न्यायाधीशः ? तथाऽपि भवतोराज्ञामुल्लङ्घितुं सर्वथाऽशक्तोऽहम् । अत उत्तरं ददामि यद् - यदि माघमासे शीतो वायुरधिकतया वहेत् तदा माघमासे शीतमधिकं भवेत्, यदि च पौषे शीतो मारुतोऽधिको वायात् तदा पौषमासेऽधिकं शीतं भवेत् । यतः शीतस्य तु शीतपवनेन सह सम्बन्धोऽस्ति न पुनर्माघमासेन पौषमासेन वा" । इति ।।

# समयस्य मूल्यम्

- सा.श्रुतलोचनाश्रीः

पश्चिमदेशे एको लॉङ्गफेलो-नामको महाँल्लेखकोऽभवत् । यौवने स महाविद्यालये पठन्नेव जीविकार्थमध्यापनमप्यकरोत्, व्ययरक्षणार्थं च गृहकार्यमपि स्वयमेवाऽकरोत् । अतस्तस्य समयन्यौन्यं सदा भवति स्म ।

किन्तु स समयस्य मूल्यं जानाति स्म । प्रत्येकं दिवसश्चतुर्विंशतिहोरामित एव भवति सर्वस्याऽपि । तत्र च प्रत्येकं क्षणः सावधानतयोपयोक्तव्यो ननु । अन्यथा बहूनि कार्याणि त्यक्तव्यानि भवेयुः । विधात्रा हि निष्पक्षपातितया कोट्यधिपतिकृते दरिद्रकृते वा समयविषये तु सर्वथा साम्यवादो निर्धारितोऽस्ति । अतो यदि प्रत्येकं क्षणः सावधानतयोपयुज्येत तदा बहूनि स्वोपयोगीनि जनोपयोगीनि च कार्याणि कर्तुं शक्येरन् ।

अतः लॉङ्गफेलोऽयं सूक्ष्मतया स्वीयदिनचर्यामवलोक्य निश्चितवान् यद्, बहुषु कार्येषु मध्यमध्ये भूयान् कालो व्यर्थो भवति स्म । यथा, कॉफीपेयनिर्माणं दशनिमेषात्मकं कालमपेक्षते । तदा च विनैव केनचित् कार्येणैवमेवोपवेष्टव्यं भवेत् । एते च दश निमेषाः केनचित् लेखनकार्येणाऽन्येन वा केनचित् कार्येण सफलीभवेयुः । अतः स अस्मिन् दशनिमेषात्मके काले किञ्चनाऽनुवादकार्यं कर्तुं निश्चितवान् । यतस्तत्राऽधिकं चिन्तनं न कर्तव्यं भवेत् । केवलं पुरःस्थितं पुस्तकमेव विलोक्य लेखनं कर्तव्यं स्यात् । प्रतिदिनं केवलं दशनिमेषेषु यावल्लिख्यते तावदेव वरम् । अवशिष्टं तु द्वितीये दिने लिख्यते । वयं कल्पितुमपि न शक्नुमो यदनया रीत्या प्रतिदिनमनुवादस्यैकं पृष्ठमर्धं वा पृष्ठं लिखता तेन दांते(DANTE)-इत्यस्य इन्फर्नो(INFERNO)-इति इटालीयभाषीयपुस्तकस्याऽऽङ्ग्लभाषायामनुवादः कृतः ।

क्षणे नष्टे कुतो विद्या, कणे नष्टे कुतो धनम् ? ।।

यः समयस्य मूल्यं न जानाति, व्यर्थकार्येष्वन्यान्यतुच्छवाचनेषु, हासगोष्ठ्यादिषु वा मुधा कालं यापयति तस्य विकासो कथं भवेत् ? । विद्या ज्ञानं वा तस्य कुतः प्राप्येत । यस्तु समयस्य मूल्यं याथार्थ्येन जानाति स एव स्वविकासं कर्तुं समर्थो भवेत् जगते च किमपि मूल्यवत् प्रदातुं शक्नुयात् ।

******

खाद्यसामग्रीविक्रेतॄणां सर्वेषां कान्दविकादीनामापणेषु फलकमेकं निलम्बितं भवति – विवाहप्रसङ्गेषु शुभप्रसङ्गेषु च भवदादिष्टं सम्पाद्यते – इति ।

तत्किम् – एते विवाहप्रसङ्गं शुभं नैव मन्यन्ते खलु !!

-----

**रमणी** भोः अद्य किं वा पचामि भोजनकृते ?

**रमणः** भवती प्रथमं पचतु, पश्चादावां तस्य नामाचरणं करिष्यावः !!

# स्थिरता

- सा.निसर्गप्रज्ञाश्रीः

कस्मिंश्चिद् ग्रामे एकः सत्पुरुष आगतः। तदुपदेशं श्रोतुं सर्वे ग्रामवासिनः समागताः। ते सर्वे ग्रामजनास्तद्वाणीजलेन पापानि क्षालयितुमिच्छन्ति स्म। कस्यचित् श्रेष्ठिनः प्रधानकर्मचार्यपि सत्पुरुषवाणीप्रभावं ज्ञात्वा सत्संग आगच्छत्। यदा स कर्मचारी समागतस्तदा सत्पुरुष ईश्वरध्यानं वर्णयति स्म। तद्वर्णनं प्रधानकर्मचारिणेऽरोचत। तत्पश्चात् सोऽपि ध्यानं कर्तुं लग्नः, किन्तु मनो न स्थिरीभूतम्।

